१ श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ श्रीलक्ष्मीनृसिंहायनमः॥ अनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनेहेतुज्ञानेसामानाधि
करण्येनप्रमितिकरणत्वसाधकंप्रमितिकरणतावच्छेदकधर्मवत्वरूपहेतुप्रदर्शनंनिश्चायकाभावादितिमुक्तामालान्तन्तार्थकयन्ति
अनुमानेति॥ इदानींव्याप्तिनिरूपणात्प्राक्॥ तस्मतीक्षो॥ उपायनिरूपणस्यप्रामाण्यव्यवस्थापनाव्यवहितोत्तरत्वत्यागं॥ तत्प्राम्यइ
ति॥ व्याप्तिनिरूपणस्यउपायनिरूपणपूर्ववर्त्वइत्यर्थः॥ अप्रमाणसाधर्म्येणेत्यादिग्रंथेनानुमानप्रामाण्यव्यवस्थापनेनवादिनि
रासात्व्याप्तिनिरूपणंव्यर्थमित्याशंकोच्छेदायसमारब्धेति॥ विशेषणमित्याशयवाहनाह्व्यासीति॥ तथाचानुमानप्रामाण्यव्यव
पनस्यैववादिनिरासहेतुत्वेपितस्याप्रसिद्धत्वेननवादिनिरासइतिभावः॥ समारब्धत्वंचवर्तमानकालवृत्तिध्वंसप्रतियोगिनास
फलायाद्यकृतिस्तद्विषयत्वंयतःसमित्युपसर्गस्यसफलत्वंआङ्पूर्वकरभतोर्धात्वाद्यकृतिःक्तप्रत्ययस्यवर्तमानध्वंसप्रतियो
गित्वरूपमतीतत्वंविषयत्वंचार्थः॥ आद्यकृतित्वंचपरीक्षाविषयककृतिध्वंसासमानकालीनत्वेसतिपरीक्षाविषयककृ
तित्वं॥ ननुक्तप्रत्ययार्थेविषयत्वेअपरोयः क्तप्रत्ययार्थःतदर्थान्वितरभधात्वर्थस्यान्वयस्वीकारएवतादृशविशिष्टान्वयबो

सर्वव्याप्ति॥१॥

न

घः स्यात्॥ सर्वं घटते प्रत्ययानां केवलप्रकृत्यर्थान्वितस्वार्थबोधकत्वस्यैव दृष्टचरत्वेन स्वार्थान्वितप्रकृत्यर्थान्वितस्वार्थबोधकत्वासंभ
वादिति चेन्न॥ प्रतिष्ठितं लिंगपूर्णयेदित्यादौ वर्तमानध्वंसप्रतियोगिनीयाप्रतिष्ठा तत्कर्मीभूतं लिंगमित्यन्वयबोधदर्शनेन तादृशबोध
कत्वस्यापि स्वीकारात्॥ परमतेति॥ परमतनिराकरणपूर्वकं॥ पराभिप्रेतार्थज्ञाने मध्यस्थस्याप्रमात्वज्ञानसंपादनपूर्वकं स्वाभिप्रेतार्थज्ञाने
प्रमात्वज्ञानसंपादनमित्यर्थ इति सांप्रदायिकाः॥ मथुरानाथभट्टाचार्यास्तु दीधितिटिप्पण्यां परमतनिराकरणपूर्वकं स्वमतेन स्वाभिप्रेतेन
हेतुना व्यवस्थापनं अनुमितिसंपादनं एतादृशपरीक्षायदार्थैकदेशव्यवस्थितावनुमानप्रामाण्यस्यान्वय इत्याहुः॥ प्रतिपादनविशेष
णमिति॥ ननु प्रतिपादनस्य प्रतिपत्तिजनकशब्दप्रयोगरूपस्य निरुक्तशब्दरूपपरीक्षाकारत्वं नैव संभवतीति चेन्न॥ परीक्षापदार्थघटक
च स्वमतव्यवस्थितौ प्रतिपादनस्य कारणत्वेन विशिष्टकारणत्वव्यवहारात्॥ नं व्यवस्थितौ वा तस्य कथं कारणत्वमिति वाच्यं॥ यतः अप्रा
ण्यसाधकत्वेन चार्वाकोक्तहेतुमत्ताज्ञाने मध्यस्थस्याप्रमात्वज्ञानसंपादनाय प्रामाण्यसाधकहेतुमत्ताज्ञानं तस्य प्रथमतः संपादनी
तच्च न संभवति प्रमितिकरणतावच्छेदकतायाः इंद्रियत्वादेरेव प्रसिद्धतया तादृशेंद्रियत्वाभावज्ञानस्यैव स्वरूपासिद्धिज्ञानस्य मध्य

स्थेविद्यमानत्वात्॥ अतस्तादृशासिद्धिनिवारणपूर्वकहेतुमत्ताज्ञानसंपादनार्थंव्याप्तिग्रहोपायप्रतिपादनमेवंरीत्यातस्यकारणत्वमिति॥ का
२ रणीभूतानस्यैवेयर्थ्यंशंकतेयद्यपीति॥ तस्यउपायप्रतिपादनस्यावतारणसर्वमित्यादिग्रंथः॥ तल्लाभात्॥ उपायप्रतिपादनस्यावश्यकत्वला
भात्॥ तथाचउपायप्रतिपादनेतादृशग्रंथेनैवसमारब्धानुमानप्रामाण्यपरीक्षाकारणत्वसूचनसंभवेपुनःकारणीभूतताभिधानंपुनरुक्ति
ग्रस्तमितिभावः॥ कारणीभूततानभिधानेव्याप्तिस्वरूपनिरूपणेप्रामाण्यव्यवस्थापकत्वलाभोनैवजायतेतदभिधानेतुव्याप्तिस्वरूपेणेउ निरू
पायप्रतिपादनजनकत्वलाभोधर्मिपारतंत्र्येणान्वयात्प्रामाण्यव्यवस्थापकत्वस्यापिलाभोभवतीतितदभिधानं॥ नचैतन्निरूपणेप्रामाण्यव्य
वस्थापकत्वलाभःकिमर्थमितिवाच्यं॥ उपायप्रतिपादनजनकेव्याप्तिस्वरूपनिरूपणेप्रामाण्यव्यवस्थापकत्वस्यापिलाभेव्याप्तिस्वरूपनिरू
पणस्यासंतावश्यकत्वलाभदित्याशयेनसमाधत्तेतथापीति॥ अथवासर्वमिदमित्याद्यवतारणग्रंथेनव्याप्तिग्रहोपायप्रतिपादनेप्रामाण्य
व्यवस्थापकत्वलाभसंभवेपिव्याप्तिस्वरूपनिरूपणस्यकेवलव्याप्तिग्रहोपायप्रतिपादननिदानत्वलाभेपिचव्याप्तिस्वरूपनिरूपणेप्रामा
ण्यव्यवस्थापकत्वाविशिष्टग्रहोपायप्रतिपादननिदानतास्यलाभेनसंभवतीत्यावश्यकप्रामाण्यव्यवस्थापकत्वविशिष्टव्या

प्तिग्रहोपायप्रतिपादनस्यासंभवंभणमकृतंविशिष्टव्याप्तिग्रहोपायप्रतिपादननिदानत्वमपिव्याप्तिस्वरूपनिरूपणस्यैवेतिवक्तव्यं॥नन्व
कारणीभूताविशेषणादेवलभ्यतेरनितद्विशेषणंसार्थकमित्याशयेनाहतथापीति॥प्रामाण्यव्यवस्थापकत्वविशिष्टव्याप्तिग्रहोपायप्र
तिपादनंप्रथमतउद्देश्यार्थइतिप्राचः॥नवीनास्तु सर्वमिदमित्याद्यवतारणग्रंथेनतादृशार्थलाभसंभवेपिपुनः कथं नं विलक्षणबो
धतात्पर्यसूचनायेत्याह॥तथापीति॥विलक्षणबोधाकारमेवप्रदर्शयति प्रामाण्यव्यवस्थापनेत्यादिग्रंथेन॥अतएवैतत्सूचना
येतिसूचनपदस्वारस्यभाजस्येनसंगच्छते॥तत्त्वतितउपायप्रतिपादनमिति॥प्राहुः नतुव्याप्तिघटकीभूताव्यभिचारांशभानेव्यभिचा
रग्रहाभावोहेतुः समानाधिकरणवृत्तिहेतुतावच्छेदकाभावग्रहेचसत्त्वाद्ग्रहोहेतुरितिक्रमेणोपायप्रतिपादनमङ्ग॥तव्याप्तिस्वरू
कपुरुषप्रत्यक्षाव्याप्तिस्कुपायप्रतिपादनेव्याप्तिज्ञानमेककारणनतु तदनुकूलव्याप्तिनिरूपणमतः कारणार्थकनिदानपदमसंग
तमित्याशंक्यतस्यप्रयोजकपरत्वंविशदयतिव्याप्तीति॥व्यापकसामानाधिकरण्यव्याप्तिज्ञानेसामानाधिकरण्यज्ञानस्यकथमपिका ण्यरूप
रणत्वंनसंभवतीत्यतआह॥समानाधिकरणवृत्तिहेतुतावच्छेदकेतितत्त्वव्याप्तिस्वरूपनिरूपणमारभ्यतेतिकथनमनुचितंतादृ

३ व्याप्तिग्रहोपायप्रतिपादनंनिदानंव्याप्तिस्वरूपंनिरूपयतिसस्यैवसम्यक्त्वेनतावत्पर्यंतानुधावनवैफल्यात्‌निदानमित्यस्यचक्रियाविशे
षणत्वेनाप्यन्वयसंभवादित्यतआह॥अथइति॥व्याप्तिस्वरूपमितिद्वितीयार्थस्यविषयइत्यस्यज्ञानानुकूलशब्दरूपधात्वर्थैकदेशेज्ञाने
न्वयः॥आख्यातार्थकृतौअपरतश्चआख्यातदर्थस्यवर्तमानत्वस्यधात्वर्थनिरूपणस्यचान्वयः॥नन्वित्यादिनेतितृतीयार्थोभेदः धान्येन
धनवानित्यादौतथादर्शनात्‌तस्यचनिरूपणेन्वयः॥एवंचनन्वित्यादिग्रंथभिन्नंयत्‌व्याप्तिस्वरूपविषयकनिरूपणंतदनुकूलेदानींतनकृ
तिमान्मणिकारइतिबोधः॥तथाचेदानींनन्वित्यादिनापूर्वपक्षस्यैवाभिधानात्‌पूर्वपक्षानुकूलेदानींतनकृतेर्वक्ष्यमाणसिद्धांतव्या॥
प्तिनिरूपणानुकूलतयाव्याप्तिस्वरूपनिरूपणानुकूलवर्तमानकृतिमत्वस्यमणिकारेबाधादसंगतिरितिभावः॥आरभतइत्यत्रकर्मितिधा
त्वर्थःसविषयकधातुसमभिव्याहारादाश्रयत्वमाख्यातार्थः॥तथाचनन्वित्यादिग्रंथाभिन्नंयत्तादृशव्याप्तिस्वरूपनिरूपणंतद्विषयके
दानींतनाद्यकृतिमान्मणिकृदितिबोधः॥नन्वेवमपिवक्ष्यमाणसिद्धांतव्याप्तिस्वरूपनिरूपणविषयकाद्यकृतेरिदानीमसत्वेनतद
वस्थैवासंगतिरित्यतआह॥निरूपणस्येति॥तदारंभेति॥निरूपणविषयकाद्यकृतिविषयेत्यर्थः॥तथाचनन्वित्यादिग्रंथस्यापि

३

निरूपणपदार्थतया तद्विषयकाद्यकृतेर्निरूपणविषयकत्वमक्षतमेवेत्यारभत इत्युक्तिकिं संगतिभावः॥ नन्वेवं निरूपयतीत्युक्तिपक्षेपि घत्व
र्थे निरूपणस्य परमतनिराकरणपूर्वकस्वमतव्यवस्थितिरूपत्वस्वीकारे बाधकाभावान्नन्वित्यादिग्रंथस्यापि निरूपणपदार्थतया नु निरूप
णानुकूलेदानींतनकृतिमत्वस्य मणिकारे बाधाभावान्निरूपयतीत्युक्तिकिरपि संगतैवेति चेन्न॥ आरभतेवाद्यकृतेः सर्वविषयत्वस्वीको ४ इत्युक्ता
पनिरूपणपदस्य यथाश्रुतार्थकत्वेप्यनुपपत्यभावात्॥ नन्वनिरूपयतीत्युक्तावप्याख्यातेन कृतित्वेनाद्यकृतेरेव बोधनस्वीकारादा
रभत इति व्यर्थमेवेति वाच्यं॥ निरूपयतीत्यास्याख्यातेन नियमत आद्यकृतिबोधने मानाभावात् आरभत इत्युक्तौ तु आङः पूर्वकर
भधातुना आद्यकृतेरेव बोधनेन अनुपपत्यभावात्॥ अथैवमाद्यकृतेः सर्वविषयकत्वस्वीकारस्यावश्यकतया निरूपणपदस्य यथाश्रु
तार्थकत्वेप्यनुपपत्यभावेन परमतेत्याद्यर्थकत्वस्वीकारो निरर्थक इति चेन्नैवं॥ निरूपणपदस्य प्रतियोग्यसमानाधिकरणेत्यादिनिरू
पणमात्रपरत्वे तत्र नन्वित्यादिनेति तृतीयार्थाभेदान्वयस्य वक्तव्यतया तस्याधेनासंगतिः स्यात् अतः स्तत्पदस्य परमतनिराकरणेत्या
द्यर्थकत्वस्वीकारस्यावश्यकत्वादिति केचित्॥ परे तु ननु व्याप्तिनिरूपणपारंभे इति कथनमनुचितं व्याप्तिस्वरूपं निरूपयतीत्यस्ये

वसंमयकत्वादद्दृत्यत आह ॥ अयमतइति ॥ असंगतमिति ॥ इदानीं पूर्वपक्षस्यैवाभिधानेन तदनुकूलकृतेर्वक्ष्यमाणव्याप्तिनिरूपणानुकूलतया व्याप्तिनिरूपणानुकूलकृतिमत्वस्य मणिकार इदानीं बाधात् असंगतिरिति भावः ॥ आरभत इत्यकमिति ॥ आद्यकृतेः सर्वविषयकत्वस्वरूपेण व्याप्तिनिरूपणारंभविषयत्वस्य पूर्वपक्षेपि संभवात् तादृशकृतेरिदानीमबाधान्नासंगतिरिति भावः ॥ नन्वनिरूपयतीत्यत्र कारपि आख्यातेन कृतित्वेनाद्यकृतेर्बोधनसंभवान्नागतिरिति वाच्यं ॥ द्वितीयादिकृतिष्वेव निरूपयतीत्यस्य भूरिप्रयोगदर्शनेन तादृशकृतीनामेव प्रायशो बोधनसंभवादसंगतेर्दुर्वारात् निरूपणस्य सिद्धांतकथनत्वादारभत इत्यत्रोक्तो आङ्पूर्वकरधातुनाद्यकृतेरेव बोधनेनानुपपत्यभावात् ॥ नन्वेवमसंगतिर्दुर्वारा निरूपणस्य सिद्धांतकथनरूपतया निरूपणाद्यकृतेः पूर्वपक्षादिविषयकत्वासंभवात् तद्विषयकाद्यकृतेस्तद्घटकया तद्विषयकत्वस्यैव स्वीकारात् ॥ अन्यथा पाकदशायां भोजनमारभत इति प्रयोगापत्तेरित्यत आह ॥ निरूपणस्येति ॥ तदारंभकतेति ॥ निरूपणविषयकाद्यकृति ॥ विषयतेत्यर्थः ॥ तथा च नासंगतिभावः ॥ इत्थं च निरूपणपदार्थघटकपूर्वपक्षेन त्वित्यादिनेत्ततीयार्थाभेदान्वयः संगच्छते ॥ नन्वनिरूपणस्य परमतनिराकरणीत्यादिरूपत्वे केवलपूर्वपक्ष

कथनस्यापिनिरूपणरूपतयानिरूपयतीत्यकावपिनासंगतिरितिवाच्यं ।। पूर्वपक्षकथस्यनिरूपणघटकत्वमेवनतुनिरूपणरूपत्वमितिस्वीकारा
त् ।। अन्यथाकेवलपूर्वपक्षकथनस्थलेपिव्याप्तिरूपयतीतिप्रयोगापत्तेरितिसंक्षेपइत्याहुः ।। ननुव्याप्त्याव्यभिचारित्वभेदोयदिसाधनीयस्तदातत्रै
वविशेषणभेदकूटरूपहेतोरपिनिश्चयस्संपादनीयः सचनसंभवतिसिद्धांतसिद्धव्याप्तेः केवलान्वयिनिरत्वेनकेवलान्वयिन्यभावादितिमणिकृदुक्तहेतोः स्व
रूपासिद्धिग्रस्तत्वादतः अव्यभिचारितत्वएवव्याप्तिभेदः साधनीयः तत्र अव्यभिचारितत्वस्यसाध्याभाववदवृत्तित्वापि पंचकरूपस्यप्रत्येकंपक्षत्वेनानागति
त्वाकरणापत्तिरित्यनुगतरूपेणैवपक्षत्वंवक्तव्यंतच्चानुगतंदुर्वचमित्याशंकायामव्यभिचारितत्वपदार्थत्वरूपमनुगतंपक्षतावच्छेदकंप्रदर्शयतितथाचाव्यभिचारे
तिप्रसिद्धांतसिद्धव्याप्तिभेदसाधनेसिद्धसाधनंभवेदित्याशयेनाहनानुमितावि ।। अनुमितिजनकतावच्छेदकविषयत्वाश्रयोनेत्यर्थः अन्यथा अव्यभिचारितत्वे
व्यापकसामानाधिकरण्यरूपव्याप्तिविषयकसमूहालंबनविषयतासत्वेनबाधापत्तिः ।। नन्वेवमपिबाधोदुर्वारएवयत्रपक्षतावच्छेदकादिकोटौ अव्यभिचा
रितत्वस्यप्रवेशः तत्रत्यानुमितिजनकतावच्छेदकविषयताऽव्यभिचारितत्वेरूपावात्तत्वानुमितिजनकतावच्छेदिकायाःपक्षतावच्छेदकावच्छिन्नवि
शेष्यतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितप्रकारतातदाश्रयभेदसाधनेचोक्तदोषानवकाशः ।। हेतुतावच्छेदकावच्छिन्नप्रकारताया

५ मनुमितिजनकतावच्छेदकत्वमनिवेश्यन्वरमप्रकारतायांतंनिवेशनेनहेत्वंशेएकत्रद्वयमितिरीत्याऽव्यभिचारितत्वसिद्धांतसिद्धव्याप्त्येनऽनुम
भयावगाहिन्यःपरामर्शःतदीयहेतुतावच्छेदकावच्छिन्नविषयतायाऐक्येनानुमितिजनकतावच्छेदकत्वात्तन्निरूपितविषयताश्रयत्वमादायपर्यवो
धत्तस्याप्यनवसरइतिवाऽयंहेतुसाध्ययोरैक्यप्रसंगादित्याशंकायांपर्यवसितमर्थमाह हेत्वनुमितिजनकत्वमिति।।अव्यभिचारपदार्थावच्छिन्न
हेतुविषयतेति।।अमान्यज्ञानीयाव्यभिचारपदार्थवृत्त्यवच्छेदकतानिरूपितहेतुविषयतेत्यर्थः।।अन्यथाव्यापकसामानाधिकरण्यरूपव्या
प्तित्वेनाव्यभिचारपदार्थावगाहिन्यमीयाव्यभिचारावच्छिन्नविषयतामादायवाधापत्तेःघटितपदंपर्याप्त्यनिवेशस्फोरणाय।।अत्रहे
तुमत्त्वस्याव्यभिचारपदार्थविषयताघटितधर्मावच्छिन्नत्वाभावसाधनेवह्न्यभाववदवृत्तिपर्वतोवह्निमान्धूमादित्यादौवह्निव्याप्यधू
मवान्वह्न्यभाववदवृत्तिपर्वतइत्याकारकपरामर्शनिष्ठानुमितिजनकतायांधर्मितावच्छेदकावच्छिन्नविषयताविधयाव्यभिचारपदा
र्थावच्छिन्नविषयत्वावच्छिन्नत्वसत्वेनवाधःकूटस्यहेतुत्वेस्वरूपासिद्धिश्चेतिसाध्यहेतुकोटौहेतुनिवेशः।।एवंचतादृशजनकताया
मव्यभिचारपदार्थवच्छिन्नहेतुविषयत्वावच्छिन्नत्वाभावादिसत्वेनवाधोनवास्वरूपासिद्धिः।।नन्वेवंतथापिवह्न्यभाववदवृत्तिधूमत्व ५

न्महानसादृशा-पर्वतो वह्निमान् धूमादित्यादिस्थलीयपरामर्शजनकतायां बाधादिदुर्वारैवेति वाच्यं ॥ अव्यभिचारपदार्थावच्छिन्नहेतुविषय
तानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नत्वाभावात् साध्यत्वादिविवक्षणे नादोषात् ॥ न च तथापि पर्वतो वह्निमान् वन्ह्यभा
ववद्वृत्तेरित्यादौ हेतुतावच्छेदकपर्यन्तस्य व्याप्तित्वपक्षे हेतुव्यापकवह्निसमानाधिकरणवृत्तित्ववह्न्यभाववद्वृत्तित्वरूपहेतुतावच्छेदकव
ह्निमान् पर्वत इत्याकारकनिर्धर्मितावच्छेदककपरामर्शजनकतायां बाधादिदुर्वारा तस्यां तादृशहेतुतावच्छेदकरूपाव्यभिचारपदार्थावच्छिन्न
हेतुविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नत्वसत्त्वादिति वाच्यं ॥ हेतुतावच्छेदकस्यैव परामर्शे हेतुव्यापकसा
ध्यसमानानाधिकरण्यवृत्तितावच्छेदकवद्धेतुमान् पक्ष इत्याकारस्य व्याप्त्यंशे धर्मितावच्छेदकस्यैव परामर्शस्य हेतुता न तु व्याप्त्यंशे धर्मितावच्छे
दकस्य हेतुव्यापकसाध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकवान् पक्ष इत्याकारस्येति गदाधरेण सिद्धान्तलक्षणे व्यवस्थापनीयत्वेन नादो
षात् ॥ न च तथाप्युक्तस्थले एव स्वव्यापकवह्निसमानाधिकरणवृत्तिवह्न्यभाववद्वृत्तित्ववद्वह्न्यभाववद्वृत्तिमान् पर्वत इत्यतरासधर्मिताव
छेदकपरामर्शजनकतायां बाधादिदुर्वारा तस्यां साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकरूपाव्यभिचारपदार्थावच्छिन्नहेतुविषयतानिरूपि

तपक्षतावछेदकावछिन्नविषयतावछिन्नत्वसत्वादितिवाच्यंपर्याप्तिंनिवेश्याव्यभिचारपदार्थपर्याप्तिविषयतानिरूपितपक्षतावछेदकावछिन्न
६ विषयताघटितधर्मावछिन्नत्वाभावस्यसाध्यत्वविवक्षणेनादोषात्॥ नन्वेवमप्युक्तदोषदुर्वारएवव्याप्तिधर्मितावछेदकविषयतानिरूपित
हेतुविषयतेत्यादिघटितधर्मावछिन्नत्वसत्वादितिवाच्यं॥ अव्यभिचारपदार्थपर्याप्तिविषयतायांधर्मितावछेदकनानात्मकत्वविवक्ष
णेनानुपपत्यभावात्॥ नन्वेवंहेतुविषयताघटितेत्यत्रहेतुपदमनर्थकं॥ पूर्वोक्तवन्ह्यभाववद्वृत्तिपक्षकपरामर्शीयवन्ह्यभाववद्वृत्ति
त्वविषयतायाधर्मितावछेदकतारूपत्वेनदोषवारणादितिवाच्यं॥ पूर्वोक्तवन्ह्यभाववद्वृत्तिहेतुकस्थलएववन्ह्यभाववद्वृत्तिसमाना
धिकरणाभावत्वादिव्याप्तिविशिष्टहेतुमत्पक्षविषयकपरामर्शजनकतायांहेतुसमानाधिकरणेत्यंशमादायकांधादेर्वारणायवि
षयतायांहेतुतावछेदकावछिन्नत्वस्यविवक्षणीयत्वेनतत्समर्पकतयाहेतुपदसार्थक्यात् वन्हिमान्तादात्म्येनवन्ह्यभाववद्वृत्ति
मत्त्वादित्यादौदोषवारणतयायथाश्रुतहेतुपदस्यापिसार्थक्याच्चेति॥ ननुतद्भिन्नसाध्याभाववद्वृत्तित्वमित्यत्रतत्पदार्थव्यभिचारि
तत्वेसाध्याभाववद्वृत्तित्वादिभेदेनक्वाप्यत्यापयितुमशक्यः बाधितत्वात्तत्सत्यदंसाध्याभाववद्वृत्तित्वमित्यादिनासामाना

६

धिकरण्येन योजनीयं तथा च प्रतियोग्यमिश्रितभेदबोधकत्वं नत्रादृष्टत्वं चेत्याशंकां वारयति ॥ व्याप्तिमित्यनुषंगेणेति ॥ ननु तत्राव्याप्तिभे
दबोधनेऽपि न तस्य हेतुत्वं संभवति वन्ह्यव्यभिचारी धूमवत्पर्वतवानयं देश इति विशिष्टवैशिष्ट्यावगाहिबोधीयजनकतायां अव्यभिचारपदा
र्थविषयताघटितधर्मावच्छिन्नत्वसत्त्वेन तदभावरूपसाध्यशून्यायामव्यभिचारादित्याशंकायां पर्यवसितहेतुमाह ॥ तथा चेति ॥ अव्यभिचारपदा
र्थ इति इदं तु सामान्यविशेषभावलाभाय न हेतुकोटिप्रविष्टमव्यावर्तकत्वादिति ध्येयं ॥ संयोगविशेषाभावकूटे संयोगसामान्याभावव्या
प्यतायां विवादेऽपि तदतिरिक्तविशेषाभावकूटे सामान्याभावव्याप्तिसर्वसंमतत्वान्नानुकूलतर्कराहित्यमित्याशयेन समाधत्ते ॥ ननु केव
लान्वयिन्यभावादित्यस्य केवलान्वयित्वग्रहकालीनानुमिति ॥ जनकज्ञानावृत्तित्वादिति नार्थः अनुमितिजनकतायां तादृशज्ञा
नावृत्तित्वरूपहेतोः स्वरूपासिद्धेरित्याशंक्य केवलान्वयित्वग्रहकालीनानुमितिजनकज्ञाने साध्याभाववद्वृत्तित्वावच्छिन्नविषयि
तयाऽभावादित्यर्थकतामाह साध्य इति ॥ ननु तादृशज्ञानवृत्तित्वविशिष्टस्य साध्याभाववद्वृत्तित्वावच्छिन्नविषयित्वाभावस्य हे
तुत्वमथवा तदुपलक्षितस्य तस्य नाद्यः स्वरूपासिद्धेः न द्वितीयः तादृशाभाववद्वृत्तिहेतुमत्पक्षप्रकारकविशिष्टवैशिष्ट्यावगाहि

जनकतायांव्यभिचारादित्याशंकायांपर्यवसितंसाध्याभाववद्वृत्तित्वावच्छिन्नविषयिताशून्यवृत्तित्वरूपहेतुमादायएवंचेति॥दा
७ र्शितसाध्येति॥कूटघटकप्रत्येकाभावेत्यर्थः॥नासिद्ध्यादिरिति॥स्वरूपासिद्धिर्व्यभिचारश्चनेत्यर्थः॥परिष्करणीयाइति॥अनुमि
तिजनकत्वंसाध्यासामानाधिकरण्यानधिकरणत्वावच्छिन्नहेतुविषयताघटितधर्मानवच्छिन्नतादृशविषयिताशून्यज्ञानवृत्तित्वा
दित्यादिरूपःपरिष्कारोबोध्यः॥अव्याप्यवृत्तिसाध्यकेतिदीधिताववच्छेदकावच्छेदेनविधेयान्वयस्यौत्सर्गिकत्वेप्यव्याप्यवृत्तिसा
ध्यकसद्धेतुत्वावच्छेदेनाव्याप्तिरूपविधेयान्वयोनाभिप्रेतःकपिसंयोगाभाववान्गुणत्वादित्यादावुद्देश्यतावच्छेदकाक्रांतेलक्ष
णसंगमनात्किंतुतत्सामानाधिकरण्येनविधेयान्वयोभिप्रेतःएतादृशाभिप्रायसूचनायैवसत्पदमुपात्तमन्यथाव्याप्तिप
दसमभिव्याहारादेवसद्धेतुत्वलाभेसत्पदवैयर्थ्यापातादतोव्याप्यवृत्तीतिग्रंथंस्थलविशेषपरतयाव्याचष्टे॥कपिसंयोगीति॰
अव्याप्तिमितीति॥ननुकपिसंयोगसाध्यकस्थलेकथमव्याप्तिःगुरुधर्मावच्छिन्नसाध्यकेसाध्यतावच्छेदकावच्छिन्ना
भावाप्रसिद्ध्याव्याप्तिवारणायसाध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावस्यसाध्याभावपदेनविवक्षणीयतयाकपिसंयो

गस्यसाध्यव्यापकत्वाभावेनद्रव्यत्वाभाववस्यैवलक्षणघटकत्वात्प्रतियोगिवैय्यधिकरण्यनिवेशप्रयोजनाभावेनतद्घटितव्यापकत्व
स्यैवनिवेशात्॥नन्वसाध्यव्यापकतावच्छेदकावच्छिन्नाभावनिवेशेद्रव्यत्वस्यसाध्यतायाजातिप्रकारकप्रमाविषयत्वादित्या
दावतिव्याप्तिःसाध्यव्यापकसत्वाद्धेत्वधिकरणेसर्वत्रसत्वेनसाध्यव्यापकसामान्याभावस्यहेत्वधिकरणेसत्वादितिवाच्यंसाध्यव्याप
कतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नाभावस्यैवनिवेशनीयतयाद्रव्यत्वाभावस्यतादृशत्वेनातिव्याप्त्यभावात्॥नन्वप्रतियो
गितावच्छेदककोटावुपलक्षिणतयाभानमसंभविअन्यथाघटवत्तिभूतलेपटाभाववमादृश्यजातिमान्नास्तीतिप्रतीतिव्यवहार
योरापत्तेरितिवाच्यं॥प्रतियोगिकासंसर्गकबुद्धौप्रतियोगितावच्छेदककोटावुपलक्षणतयाभानासंभवेपिप्रतियोगिताप्रकारक
बुद्धौतथाभानस्यकूटाघटितेव्यवस्थापनीयतयाव्यापकतावच्छेदकत्वोपलक्षितरूपावच्छिन्नप्रतियोगिताकाभावनिवेशस्य
संभवादितिचेद्दिशैवसाध्यतावच्छेदकसंबंधेनैवसाध्यव्यापकतायाःविवक्षणीयतयातच्छरीरेप्रतियोगिवैय्यधिकरण्या
प्रवेशेसंप्रयोगेनसाध्यतास्थलेसाध्यतावच्छेदकसंयोगसंबंधेनसाध्यव्यापकतायाअप्रसिध्याव्याप्तिस्तद्वारणायव्यापक

ताद्दशीरप्रतियोगिवैयधिकरण्यप्रवेशस्यावश्यकेनाव्याप्यवृत्तिसंयोगस्यापिप्रतियोगिवैय्यधिकरण्यघटितसाध्यव्यापकता
याअक्षतत्वेनतदभाववत्तिवृत्त्यादिहेतोःसत्वाद्व्याप्तिसंगतिः नन्वव्यापकत्वतदवच्छेदकरूपावच्छिन्नत्वस्य गौरवप्रतियोगित्वयोरे
कसंबंधावच्छिन्नत्वस्यगौरवग्रस्तत्वेपिविशेषणताविशेषावच्छिन्नत्वस्यगौरवग्रस्तत्वेपिविशेषणताविशेषावच्छिन्नत्वस्य
संभवितयाकपिसंयोगस्यविशेषणतासंबंधघटितत्वसाध्यव्यापकत्वाभावेननाव्याप्तिसंगतिर्वाच्यंसकलदोषोधाराना
वश्यकत्वेनसाध्यतावच्छेदकसंबंधघटितव्यापकत्वाभिप्रायेणव्याप्तिकथनादिति। वस्तुतस्तुगुरुधर्मस्यप्रतियोगिता
वच्छेदकत्वस्वीकारेणतदवच्छिन्नसाध्यकेव्याप्तेरनवकाशेनसाध्यव्यापकतावच्छेदकावच्छिन्नाभावपर्यंतताविवक्षणात्तु
कपिसंयोगसाध्यकेव्याप्तिकथनसंगतिः अतएवैतल्लक्षणस्यव्यभिचाराभावरूपत्वंसंगच्छतेसाध्यतावच्छेदकावच्छिन्नाभा
भाववद्वृत्तित्वस्यैवव्यभिचारपदार्थत्वादिति। युक्ततरंचैतत्। गुरुधर्मस्यानवच्छेदकत्वकल्पेसाध्यव्यापकतावच्छेदका
वच्छिन्नाभावनिवेशेपिगुरुधर्मावच्छिन्नसाध्यकेगुरुधर्मानवच्छिन्नवनिष्ठाभावप्रतियोगितावच्छेदकत्वस्यगुरुधर्मेघ

ष्टित्वेन तदवच्छिन्नभेदाप्रतिसाध्याव्याप्तिवारणाय तादृशप्रतियोगितावच्छेदकं यद्यत्तत्तद्भेदकूटस्यैव वक्तव्यतया तादृशभेदकूटस्य दु
र्ज्ञेयत्वात्॥ परंतु गुरुधर्मस्य प्रतियोगितावच्छेदकत्वेपि साध्याभावपदेन साध्यव्यापकाभावविलक्षणमनावश्यकं गुरुधर्मावच्छिन्न
साध्यकहेतावपि केवलान्वयित्वमिति वाच्यं गुरुधर्मस्य हेतुतावच्छेदकसंबंधानुयोगिनिष्ठाभावप्रतियोगितावच्छेदकतया तादृ
शानवच्छेदकधर्मवत्त्वरूपकेवलान्वयित्वस्य गुरुधर्मावच्छिन्नसाधारण्यात् अत एव समवायेन जातेरित्यादौ संताभावाधिकरणवृत्ति
त्वस्य समवायावच्छिन्नस्याप्रसिध्याव्याप्तिसत्वेपि न क्षतिः हेतुतावच्छेदकसंबंधानुयोगिनिष्ठत्वघटितकेवलान्वयित्वस्य सत्तात्वा
वच्छिन्नसाधारण्यात् तथा च कपिसंयोगसाध्यकैतावव्याप्तिसंगतिरित्याहुः॥ नन्वेवं दीधितौ अव्याप्तेरित्यनुक्त्वाव्याप्तिमा
शंकेति कथनं किमभिप्रायकमिति चेदत्र केचित्॥ व्याप्यवृत्तित्वविशिष्टसाध्याभावाधिकरणतायाः विवक्षणे व्याप्यभा
वाद्यथाश्रुतेव्याप्याशंकया लक्षणांतरं न तु वस्तुगत्याव्याप्तिरित्यभिप्रायकमाशंकेति कथनं च व्याप्यवृत्तित्वविशिष्ट
साध्याभावाधिकरणतानिवेशयितुमनर्हे कपिसंयोगाभाववान् सत्त्वादित्यादौ व्याप्यवृत्तिसाध्याभावस्याप्रसिद्धत्वादव्या

ग०८।०

प्तिरितिवाच्यंकेवलान्वयिन्यव्याप्तेर्ग्रंथकृतैववक्ष्यमाणत्वात्॥नन्वेवमपिकपिसंयोगिभिन्नंगुणत्वादित्यादौसाध्याभावस्यकपिसंयोगा
१ देर्व्याप्यवृत्तित्वाभावेनाव्याप्तिःअन्योन्याभावस्याव्याप्यवृत्तित्वनियमवादिनयेतस्यकेवलान्वयिन्यंतर्गतत्वादितिवाच्यंव्याप्य
वृत्तिमदन्योन्याभावात्यंताभावस्यप्रतियोगितावच्छेदकस्वरूपत्वेपिअव्याप्यवृत्तिमदन्योन्याभावाभावस्याव्याप्यवृत्तेरतिरिक्तस्यस्वी
कारादित्याहुः॥साध्यवत्ताग्रहविरोधितानियामकसंबंधेनसाध्याभावाधिकरणतायावक्ष्यमाणतयाकपिसंयोगवत्ताज्ञानेप्र
तिनिरवच्छिन्नविशेषणतासंबंधेनैवकपिसंयोगाभाववत्ताज्ञानस्यप्रतिबंधकत्वमतेतेनसंबंधेनसाध्याभावाधिकरणं
गुणादिकमेवेत्यव्याप्तिःनचकाशःअव्याप्यवृत्तिताज्ञानस्योत्तेजकत्वमतेस्वरूपसंबंधेनकपिसंयोगाभाववत्ताज्ञानस्या
पिप्रतिबंधकतयातेनसंबंधेनाभावाधिकरणंवृक्षोपिसव्याप्तिरित्यादिन्यायेनाशंक्येतिकथनमित्यपिवदंतियद्यपिदीधि
ताविदमवतारणमेवासंगतंसाध्याभाववदवृत्तित्वादिलक्षणपंचकस्यविभिन्नकर्तृकत्वेनतदनपेक्षणात्॥एककर्तृत्वए
वतदपेक्षणात्तथापिमणिकृतासाध्यवदन्यावृत्तित्वमित्यारभ्यैवलक्षणपंचकंकिमितिनप्रणीतमित्याशंकाममाननी

२

सुदीधितिकृन्मधुरेणसमापयेदितिन्यायमनुसृत्यपंचमलक्षणस्यमधुरत्वंप्रदर्शयितुंलक्षणचतुष्टयेयथाकथंचिद्दोषग्रस्त
त्वंदर्शयतीत्यत्रतादृशग्रंथस्यतात्पर्यंबोध्यं॥अन्यदेशकालेति॥प्रतियोग्यवच्छेदकान्यदेशकालेत्यर्थः॥कालग्रहणेनके
वलकालिकाव्याप्यवृत्तिसाध्यकेव्याप्तिःसूचिता॥नतुसाध्यवद्भिन्नेतिसप्तमीतत्पुरुषावलंबनंदीधितिकृतामनुचितंलक्ष
णास्वीकारेणगौरवात्॥अधिकरणभेदेनाभावभेदमतंविनालक्षस्यानिर्वाहइत्याशंकापरिजिहीर्षुःकर्मधारयपरित्यागबीजं
दर्शयति॥साध्येति॥साध्यवद्भिन्नवृत्तित्वापेक्षयासाध्यवद्भिन्नीयघटितस्यगुरुत्वेपिगुरोरवच्छेदकत्वमवलंब्याहलक्ष
णंत्वति॥प्रकृत्यसमवधानेमतुपोसाधुत्वेपितत्स्थानेसंबंधिपदंयोजनीयमित्याशयेनाहवैयर्थ्येति॥ननुसाध्यवद
द्भिन्नीयधर्मिकावृत्तित्वपर्याप्तप्रतियोगितावच्छेदकताभावात्साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वस्यपर्याप्तप्रतियोगिता
वच्छेदकताभावोविलक्षणएवेत्यखंडाभावघटकतयासार्थक्यसंभवेवैयर्थ्यकथनमसंगतंनचगुरुधर्मस्यप्रतियोगि
तावच्छेदकत्वमतावलंबिनेदमितिभ्रमितव्यं॥साध्यवद्भिन्नीयंयत्तद्वृत्तित्वस्यैवलक्षणत्वसंभवादितिग्रंथवि

रोधात्॥ तत्रत्वसाध्यवद्भिन्नवृत्तित्वस्यैवलघुत्वादितिचेदत्राहुः गुरोरनवच्छेदकत्वमतेपिसाध्यवद्भिन्नसाध्याभाववद्वृत्तित्वे
१० प्रतियोगितावच्छेदकतानांगीक्रियते॥ अव्यावर्तकसाध्याभावघटितत्वात् अव्यावर्तकेप्रतियोगितावच्छेदकतानंगीकारात् नन्वेवं
साध्यवद्भिन्नीयधर्मिवृत्तित्वत्वस्याप्यवच्छेदकतानस्याद्व्यावर्तकधर्म्यंशाघटितत्वादितिवाच्यं यतोभावप्रतीतौहिप्रतियोगिवि
शेषणतापन्नस्यैवावच्छेदकतामवगाहते नतुविशेषणतानापन्नस्यापि एवंचसाध्यवद्भिन्नीयधर्मिवृत्तित्वरूपप्रतियोगिनिसाध्य
वद्भिन्नविशेषितवृत्तित्वत्वस्याविशेषणतयासाध्यवद्भिन्नविशेषितधर्मिवृत्तित्वत्वेवच्छेदकतासिध्यतिसाध्यवद्भिन्नसाध्याभा
ववद्वृत्तित्वरूपप्रतियोगिनीतुसाध्यवद्भिन्नविशेषितधर्मवृत्तित्वत्वस्यापिविशेषणतयाव्यावर्तकसाध्याभावघटितेप्रतियो
योगितानवच्छेदकतानसिध्यतीतिवैषम्येणसाध्याभाववैयर्थ्याकथनमितितन्नैवं कंबुग्रीवादिमत्त्वावच्छिन्न
साध्यकस्थलेव्याप्तिःसाध्यतावच्छेदकावच्छिन्नभावप्रसिद्धेरितिवाच्यं॥ तेनरूपेणसाध्यतेवनेत्यभिप्रायादित्यलं
पक्षत्वेनेतिसप्तमीतत्पुरुषमितिनुसप्तमीशौण्डैरित्यत्रसप्तमीयोगविभागसप्तमीतत्पुरुषोवक्तव्यः सचन

संभवति सप्तम्या एवानुपपत्तेः साध्यवद्भिन्नेत्यस्य कारकत्वाभावेन सप्तम्याधिकरणे चेति सूत्रस्याप्रसरणात् नन्वात्र क्रि
याध्याहारणीयेति वाच्यं ॥ तथा सति सापेक्षतया सामर्थ्येन समासानुपपत्तेर्दुर्वारत्वादिति चेन्न ॥ सप्तम्यधिकरणे चे
ति सूत्रस्थानुक्तसमुच्चायकचकारेणाकारकवाचिनोपि सप्तमीविधानात् ॥ केचित्तु साध्यवद्भिन्ने विद्यमानः सा
ध्याभावस्तथेति मध्यमपदलोपि समासं भवति ॥ न साध्याभावांशे वैयर्थ्यमिति ॥ न च साध्याभाववद्भिन्नविशेषितवृत्ति
विशेषितसाध्याभावघटितलक्षणे साध्यवद्भिन्नविशेषितधर्मिघटितलक्षणस्याप्रवेशेन वैयर्थ्याभावेपि गौरवमक्षत
मेवेति वाच्यं लक्षणस्य लक्षणांतरादूषकत्वाद्दूषकत्वादिति हृदयं ॥ मन्त्र एवेति अन्यथैतल्लक्षणेप्यव्याप्यवृत्तिसाध्य
काव्याप्तेर्दुर्वारत्वापत्तिः न च साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभावविलक्षणमदोषदुष्टवतिवाच्यं तथा सति साध्यव
द्भिन्नवृत्तित्वविशिष्टस्य साध्यवत्त्वसत्त्वेन तादृशविशिष्टवदवृत्तित्वस्यैव लक्षणत्वे संभवात् साध्याभावपदवैयर्थ्या
त् ॥ व्याप्यवृत्तित्वादिरूपेति आदिना प्रतियोगिसामानाधिकरण्यप्रतियोग्यसामानाधिकरण्ययोः परिग्रहः ॥ विरुद्ध

११ धर्माध्यासेनेति ॥ मिथोविरुद्धधर्मद्वयविषयकभ्रमात्मकप्रत्य।यानुरोधेत्यर्थः ॥ सचप्रत्ययः संयोगाभावोगुणेव्याप्यवृत्तिः द्रव्येन
तथा ॥ द्रव्येप्रतियोगिसमानाधिकरणः गुणेनतथेत्याकारकः ॥ व्याप्यावृत्तित्वंस्वसमानाधिकरणाभावप्रतियोगित्वंअव्याप्य
वृत्तित्वंचतादृशाभावप्रतियोगित्वमित्यादिकमूह्यं ॥ भेदकाभावेनेति ॥ ननुवाकाद्यभावादेरुक्तव्याप्यवृत्तित्वादिरूपभेदका
संभवेपिकुंडत्वसामानाधिकरण्यतदसमानाधिकरण्यादिरूपभेदकसंभवाद्भेदसिद्धेर्देवेतिवाच्यंतथासतिद्रव्यत्वा
दीनामपिभेदापत्तेः तस्माद्व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिकमेवभेदकमित्यभिसंधिः अतएवेति ॥ व्याप्यवृत्तित्वा
व्याप्यवृत्तिदीनामेवभेदकत्वस्यलक्षणकर्तृसंमतत्वादेवेत्यर्थः ॥ निराकरिष्यतीतिव्याप्यवृत्तित्वंस्वाधिकरणगुणा
दिनिष्ठाभावाप्रतियोगित्वंअव्याप्यवृत्तित्वंतुस्वाधिकरणद्रव्यनिष्ठाभावप्रतियोगित्वंअनयोर्नीलघटपीतघटाभाव
समशीलत्वान्मिथोनविरोधः प्रतियोग्यधिकरणवृत्तिप्रतियोग्यनधिकरणवृत्तित्वयोस्तुभावाभावरूपताविरहेण
नविरोधः अवयवव्युत्पत्त्यातादृशार्थालाभात्पारिभाषिकत्वंव्याप्यवृत्तिपदानामित्येवंनिराकरणप्रकारोबोध्यः

ननुभेदत्वसामानाधिकरण्यतदसामानाधिकरण्यादीनामपिथो विरुद्धत्वाद्भेदकत्वमस्त्वेव परं त्वभावभेदकत्वमेव न तु भावभे
दकत्वमप्यनुगतजातिभंगापत्तेः एवं चाभावमात्रस्याधिकरणभेदेन भिन्नमिति प्राचामभिमत एवं दीधितिकृत्तथासत्यभाव एव न सिध्येदित्यभा
वमात्रं निराकरिष्यति अन्यथाव्याप्यवृत्त्यभाव एव न सिध्येदिति तमेव निराकुर्यात् एतानि च भेदकानीति ग्रंथस्तूपलक्षणपरस्तथा च साध्यपदं व्यर्थ
मित्याशंक्य प्रकारांतरेण सार्थकमिति ॥ अथवेति ॥ साध्याभावपदं साध्याभावेत्यत्र साध्यपदमनुयोगित्वाविशेषसंबंधेन साध्यी
यपरमिति ॥ तत्पुरुषे पूर्वपदस्य निरूढलक्षणायाः सर्वसंमतत्वादिति भावः संबंधव्यावृत्तानुयोगितलाभायाऽनुयोगितावि
शेषेति अन्यथा साध्यवह्निन्नवृत्तिवह्निप्रतियोगिकसमवायवति पर्वते धूमस्य वृत्तेरव्याप्तेः ॥ नन्वेवमभावपदं व्यर्थं तादृशानु
योगिताविशेषेण साध्यीयत्वस्यैवानतिप्रसक्तत्वादित्याशंक्य विलक्षणानुयोगितानिवेशतात्पर्यग्राहकतया तत्सार्थकयति ॥
अभावीयविलक्षणेति ॥ भावाभावसाधारणानुयोगिताविशेषेत्यर्थः ॥ भावभिन्नमात्रवृत्त्यनुयोगितानिवेशघटत्वाभावादिसाध्यका
व्याप्तेः तत्र तादृशानुयोगितासंबंधसाध्यीयत्वस्याप्रसिद्धेः ॥ प्रयोजनाभावादिति ॥ एतेन भावाभावसाधारणाभावत्वनिवेशो व्यावर्त

९२ कृताभावभिन्नत्वरूपाभावत्वनिवेशेनाभावसाध्यकेव्याप्तिरितिनिरस्तं॥असंभवइतिनन्वत्रसाध्यवह्निन्नवृत्तित्वसाध्यवत्तायाश्चविरो
धितानियामकसंबंधेनैववक्तव्यमन्यथाकपिसंयोगादिसाध्यकाव्याप्तितादवस्थ्यापत्तिःवृक्षवृत्तिसाध्याभावस्यापिसाध्यवह्नि
गुणादौकालिकादिसंबंधेनवृत्तेःतथाच जात्यभाववान्सत्ताभावादित्यादौतादृशसंबंधःसमवायस्तेनसाध्यवह्निन्नवृत्तेःकस्या
पितेनसंबंधेनहेत्वधिकरणेसत्वेनलक्षणसमन्वयःसंभवतीतिकथमसंभवःसाध्यतावच्छेदकादिभेदेनव्याप्तिर्विभिन्नत्वेनवह्निमा
न्धूमादित्यादिस्थलीयव्याप्तेरसंभवइत्यर्थकत्वेपिवह्निमान्धूमादित्यादौतादृशःसंबंधोभावीयदैशिकविशेषणतातेनसंबंधेन
प्रमेयत्वंसाध्यवह्निन्नवृत्त्येवनभवतीतिकथमसंभवः॥गगनाभावादेस्तादृशसंबंधेनसाध्यवह्निन्नवृत्तित्वेपितमादायनासंभवा
वसरःअभावमात्रस्याधिकरणभेदेनभेदादितिचेदत्रप्रवदंत्यभिज्ञाःदैशिकविशेषणतात्वेनैवदैशिकविशेषणतायाःसंसर्गता
नतुअभावीयदैशिकविशेषणतात्वेनविशेषरूपेणसंसर्गतायाःगदाधरासंमतत्वादेवंचवह्निमान्धूमादित्यादौतादृशसंबंधः
दैशिकविशेषणतातादृशेनसंबंधेनप्रमेयत्वंसाध्यवह्निन्नवृत्त्येवेत्यसंभवसंभवइति॥वस्तुतस्तुप्रमेयत्वाद्यादायासंभवक

थनंयथाश्रुताभिप्रायेणसाध्यपदस्यनिर्विवादप्रयोजनंतुघटत्वाभाववान्पटत्वादित्यादौसमवायादेतादृशतयातेनसंबंधेनसाध्यवद्भिन्न
वृत्तिद्रव्यत्वाद्यादायाव्याप्तेर्वारणरूपंबोध्यं॥एतेनप्रमेयत्वादेर्विषयतारूपेविषयभेदेनभिन्नत्वेपिनक्षतिः॥ननुसाध्यपदसार्थक्यायाभा
वपदस्यानुयोगितातात्पर्यमाहत्वंवर्णनमनुचितंसाध्यवद्भिन्नपदस्यस्वप्रतियोगिमद्भिन्नपरत्वेनैवसाध्यपदसार्थक्यात्तन्नस्वप्रति
योगिवद्भिन्नत्वंस्वप्रतियोगितावच्छेदकत्वेनानुगतीकृतप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदःस्वप्रतियोगितावच्छेद
कयत्किंचिद्धर्मावच्छिन्नाधिकरणत्वावच्छिन्नभेदोवाआद्येऽसंभवःसर्वत्रैवसाध्याभावस्यपूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावप्र
तियोगिकतयास्वप्रतियोगिमद्भिन्नत्वस्यैवाप्रसिद्धेःद्वितीयेघटत्वकपिसंयोगान्यतराभाववानात्मत्वादित्यादावव्याप्तिःकपिसंयोग
रूपसाध्याभावस्याधिकरणेआत्मनिगुणसामान्याभावत्वरूपस्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणभेदसत्त्वात्गुणसामा
न्याभावभावस्यनिखिलगुणस्वरूपत्वेनकपिसंयोगरूपतयागुणसामान्याभावस्यकपिसंयोगात्मकसाध्याभावप्रतियोगिताव त्व
च्छेदकत्वादितिवाच्यंयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तिसाध्यतावच्छेदकावच्छिन्नतादृशप्रतियोगिताकाभा

वासद्द्वद्वृत्तित्वस्यैवविवक्षितत्वेनादोषात् उक्तिचिन्त्यउद्धरत्वात् इति साध्याभावप्रतियोगित्वेन साध्योपादानस्य शिरोवेष्टनेनासिकास्पर्शन
१३ तुल्यत्वात् अथ एतेन स्वप्रतियोगितावच्छेदकसंबंधेन साध्यवद्भिन्ने वर्त्तते यः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितासंबंधेन सा
ध्यीयोभावस्तद्वद्वृत्तित्वमर्थः तथा च साध्यपदानुपादाने स्वप्रतियोगितावच्छेदकसमवायादिसंबंधेन वन्ह्यादिमतोन्यस्मिन्वर्त्त
ते यः समवायेन वन्ह्यभावस्तद्वृत्ति धूमादेः सत्वाद्दोषस्तद्वारणाय तत्सार्थक्यमिति परास्तं साध्यतावच्छेदकसंबंधस्य साध्यतावच्छे
दकसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकसंबंधत्वेनोपादानस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात्। साध्यतावच्छेद
कादिभेदेन व्याप्तिर्विभिन्नत्वेन संबंधस्य संयोगत्वादिनैव निवेशनीयतया साध्यपदवैयर्थ्यस्य दुर्वारत्वात् अथैवमपि साध्यवद्भि
न्नश्चासौ साध्याभावश्च साध्यवद्भिन्नसाध्याभावस्तद्वद्वृत्तित्वमिति कर्मधारयघटित एव समुचितः साध्यवत्त्वं च स्वप्रतियोगि
कत्वस्वसामानाधिकरण्योभयसंबंधेन बोध्यं तेन प्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वसाध्यतावच्छेदकसंबंधा
वच्छिन्नत्वयोरनिवेशेपि न क्षतिः। तन्न द्रव्यत्वाभावसंबंधातिरावच्छिन्नवन्ह्यभावयोरुक्तोभयसंबंधेन साध्यवत्तया लक्षणाघ
घटकत्वात् एवं च घटाभावादिवारकतया साध्यपदस्य सार्थक्यं साध्यवद्भिन्नसाध्याभावाप्रसिद्ध्या केवलान्वयिन्यभावादिति १३

मूलसंगतिश्चोपपद्यतेनचसामानाधिकरण्यघटकवृत्तित्वंदैशिकविशेषणतासंबंधेनवक्तव्यमन्यथावह्निमान्धूमादित्यादौसाध्य
वदन्यसासाध्याभावाप्रसिद्धिःवह्न्यभावादेरपिकालिकादिसंबंधेनपर्वतादिवृत्तित्वात्तथाचपर्वतावृत्त्यभावस्यलाघवात्सर्वतत्त्व
रूपस्यसाध्यप्रतियोगिकस्यलक्षणघटकत्वेनतद्वत्त्वमादायदोषइतिवाच्यं॥पर्वतावृत्त्यभावस्यभावप्रतियोगिकतयानतिरिक्त
त्वेनादोषात्नचस्वप्रतियोगिकत्वनिवेशोव्यर्थइतिवाच्यंसाध्यपदार्थैक्यायतन्निवेशात्अखंडाभावघटकतयासार्थक्यात्त्व
स्कतत्स्कसामानाधिकरण्यसंबंधेनैवसाध्यवत्त्वमुच्यतांसाध्यपदंतुतत्संबंधलाभायनचैवंपर्वतत्वादेरपिसाध्यवह्निमत्तयातद्व
त्त्वमादायदोषइतिवाच्यंविशेषणताविशेषेणैवसाध्यवह्निमत्ताभाववत्त्वस्यविवक्षणेनादोषात्॥अधिकरणभेदेनाभावभेदाभावेपि
कपिसंयोगीएतद्वृक्षत्वादित्यादौनक्षतिःगुणाद्यसमवेताभावस्यैवलक्षणघटकत्वादितिचेन्नआद्यपक्षेजातिमान्सत्ताप्रका।
रकप्रमाविषयत्वादित्यादौघटत्वाभावस्यपिलक्षणघटकतयातद्वृत्तिहेतोर्वृत्तित्वेनाव्याप्तेःयादृशसाध्यप्रतियोगिकत्वं
नतादृशसाध्यवद्वृत्तित्वंयादृशसाध्यवद्वृत्तित्वंनतादृशसाध्यप्रतियोगिकत्वमित्युभयसंबंधेनसाध्यवदन्यत्वस्यतत्रसत्त्वा।
त्तून्नचसाध्यतावच्छेदकविशिष्टान्यत्वमेवतन्निवेश्यंसाध्यतावच्छेदकवैशिष्ट्यंचस्वाश्रयप्रतियोगिकत्वस्वाश्रयवद्वृत्तित्वो

भयसंबंधेनेतिनदोषइत्तिवाच्यंसाध्यतावच्छेदकवह्नेर्घटितस्यसाध्यवह्निमत्साध्याभाववद्वृत्तित्वरूपमूलोक्तलक्षणपरिष्काररूपत्वा
१४ संभवात्॥गौरवाच्चद्वितीयकल्पेसाध्यपदस्यकथंचिदर्थबोधकत्वसंभवेकेवलतात्पर्यग्राहकत्ववर्णनस्यान्याय्यत्वात्नन्वेवंते
ष्वभावपदस्यकेवलतात्पर्यग्राहकत्वमस्त्येवेतिभणितव्यं॥धर्मिबोधनस्यापिसंभवात्महानसीयवह्नित्वेति॥ननुसाध्यता
वच्छेदकपर्याप्तप्रतियोगितावच्छेदकताकत्वमपिमहानसीयवह्न्यभावस्याक्षतंतदभावप्रतियोगितावच्छेदकतायाःनिरवच्छिन्न
त्वादिधर्मवत्याःवह्निपर्याप्तायाःमहानसीयत्ववृत्त्यवच्छेदकतातोविलक्षणत्वात्॥नन्वेवंसाध्यतावच्छेदकपर्याप्त्यवच्छेदक
ताकत्वंचसाध्यतावच्छेदकेतरनिष्ठावच्छेदकत्वनिरूपकत्वमितिवाच्यंतथासतीतरनिष्ठावच्छेदकत्वानिरूपकत्वस्यापिमहा
नसीयवन्ह्यभावप्रतियोगितायांविशिष्टाभावादिकमादायाक्षततत्वेनतत्तुदोषतादवस्थ्यात्नन्वानिरूपकत्वंकिंचिद्विशि
ष्टनिरूपकत्वाभाववारणायपूर्वरीत्यापरिष्करणीयमितिवाच्यंअनवस्थापत्तेःतथाचमहानसीयवन्ह्यभाववारणंकथमि
तिचेदत्रब्रूमःमहानसीयत्ववह्नित्वगतयोरवच्छेदकत्वयोर्विलक्षणत्वेपितदभावप्रतियोगितावच्छेदकतात्वावच्छिन्नप
र्याप्तिरपिविलक्षणास्वीक्रियतेसाचव्यासज्यावृत्तिःएवंचयादृशप्रतियोगितावच्छेदकतात्वावच्छिन्नपर्याप्त्यवच्छेदकंसा

ध्यतावच्छेदकतापर्याप्त्यवच्छेदकं तादृशप्रतियोगिताकाभावोनिवेश्यतेमहानसीयवह्न्यभावप्रतियोगितावच्छेदकतात्वाव
च्छिन्नपर्याप्त्यवच्छेदकं महानसीयत्वादिगतं द्वित्वं साध्यतावच्छेदकतापर्याप्त्यवच्छेदकं तु वह्नित्वगतं तल्लक्ष्यत्वमितिनकोपि
दोषः सामानाधिकरण्यसंबंधेनमहानसीयत्वविशिष्टयद्वह्नित्वंतदवच्छिन्नाभावसत्वेतद्वारणायावच्छेदकतायांनिरवच्छिन्नत्वंनिवेश्य
तिलक्षणंवक्तुंनेति॥ अत्रेदंबोध्यं अनुयोगितासंबंधेनसाध्यविशिष्टः साध्याभावः नचमहानसीयवह्न्यभावादिरपितादृशोभवत्येवेति
वाच्यंमहानसीयत्वविशिष्टवह्नित्वाद्यवच्छिन्ननिरूपितानुयोगितायाः साध्यतावच्छेदकवह्नित्वविशिष्टसंबंधताविरहात्॥
अतएवगदाधरः सिद्धांतलक्षणेउभयत्वाद्यवच्छिन्ननिरूपितानुयोगितायाः मणित्वादिविशिष्टसंबंधताविरहादितिवक्ष्यतीति
अधिकरणभेदेनाभावभेदमतेनाह पृथिवीत्वेत्येति॥ तादृशान्यतरत्वावच्छिन्नाभावस्यपृथिवीमात्रवृत्तित्वेनद्रव्यत्वानात्मक
त्वाभीव्याप्तिरितिभावः अधिकरणभेदेनाभावभेदेव्याहद्रव्यत्वाभावादाविति॥ इदंतुयथाश्रुताभिप्रायेण अन्यथातुद्रव्यत्व
प्रकारकप्रमाविशिष्यत्वाभावसाध्यकेबोध्यं॥ तेनसाध्यवत्ताग्रहविरोधितानियामकसंबंधेनसाध्याभाववत्त्वस्यविवक्षणीय

त्याकालिकसंबंधेनद्रव्यत्वाभाववत्ताज्ञानंप्रतिस्वरूपसंबंधेनतदभाववत्ताज्ञानस्यैवाविरोधितयातेनसंबंधेनद्रव्यत्व
मादायाव्याप्तेरसत्वेपिनक्षतिः॥आकाशाभावस्याप्यधिकरणभेदेनभेदान्नाव्याप्तिरतआहघटत्वाभाववतिसाध्यतावच्छेदक
 संबंधेनसाध्यवत्ताज्ञानमिति॥नन्वत्रप्रतिबध्यादितिसाध्यतावच्छेदकसंबंधानिवेशनमफलमन्यसंबंधेनसाध्यप्रका
रकज्ञानंप्रतिकालिकसंबंधेनसाध्याभावप्रकारकज्ञानस्याप्रतिबंधकतयातेनसंबंधेनसाध्याभाववत्वमादायदोषःप्र
सक्तेः॥नचसाध्यतावच्छेदकसंबंधानिवेशेवह्न्यभाववत्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावप्रकारक
स्वरूपसंसर्गकज्ञानस्याप्रतियोगितासंबंधेनवह्नित्वावच्छिन्नप्रकारकतयाऽप्रतिबंधकत्वात्कालिकसंसर्गकवह्न्य
भावप्रकारकंज्ञानंतद्विषयकालिकसंबंधवारणायासाध्यतावच्छेदकसंबंधनिवेशनमावश्यकमितिवाच्यं॥तावतापि
प्रतियोगितासंबंधेनवह्निमान्भूतध्वंसत्वादित्यत्रसाध्याभाववत्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताका
भावज्ञानस्यप्रतियोगितासंबंधेनसाध्यप्रकारकतयाऽप्रतिबंधकज्ञानविषयकालिकसंबंधमादायाव्याप्तेर्दुर्वारत्वा

त्।ऽभावत्वावच्छिन्नविशेष्यतानिरूपितत्वस्यसाध्यतावच्छेदकावच्छिन्नप्रकारताविशेषणत्वोपगमेचसाध्यतावच्छेदकसंबंधे
नैतस्यैवयथ्थ्यादितिचेदत्रप्रवदंत्याभिज्ञाःसाध्यवत्ताज्ञानप्रतिबंधकत्वंयदिसाध्यवत्ताज्ञाननिष्ठप्रतिबध्यतानिरूपकत्वंतदा
पर्वतोवह्न्यभाववत्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकाभाववान्वह्निमांश्चेतिसमूहालंबनंप्रतिकालिकसंबं
नवत्स्यभावयवान्पर्वतइत्याकारकनिश्चयस्यप्रतिसंबंधेंतयातद्विषयकालिकसंबंधमादायदोषःनवसाध्यतावच्छेदकावच्छि
न्नप्रकारताघटितधर्मावच्छिन्नप्रतिवध्यतानिवेशान्नसमूहालंबनमादायदोषइतिवाच्यंतथाप्रतियोगितासंबंधेनवह्निसाध्यकत
ध्वंसत्वहेतुकोक्तस्थलेसाध्याभाववानितिज्ञानस्यतादृशतयातद्विषयकालिकसंबंधमादायाव्याप्तेर्दुर्वारत्वादतःसाध्यवत्ताज्ञा
नसामान्यप्रतिबंधकत्वंवक्तव्यंतच्चसाध्यवत्ताज्ञानत्वव्यापकप्रतिवध्यताकत्वपर्यवसितंतथाचसाध्यतावच्छेदकसंबंधानिवे
शेसाध्यवत्ताज्ञानत्वस्यसंबंधांतरेणसाध्यवत्ताज्ञानसाधारणतयातादृशसाध्यवत्ताज्ञानत्वव्यापकप्रतिवध्यतायासाध्याभाववन्नि
श्चयनिरूपिताऽयाअप्रसिद्धिरतःसाध्यतावच्छेदकसंबंधनिवेशनंएवंसाध्यवत्ताज्ञानमित्यत्रसाध्यपदंसाध्यताव

छेदकविशिष्टपरं॥ज्ञानपदंचप्रतिबंधकसमानधर्मितावच्छेदककज्ञानपरमतः साध्यतावच्छेदकधर्मावच्छिन्नसाध्यतावच्छेदकसंबंधाव
छिन्नप्रतियोगिताकाभाववत्त्वकंस्वप्रकारकनिश्चयस्यसाध्यवत्ताज्ञानसामान्यांतर्गतविभिन्नरूपेणसाध्यप्रकारकंभिन्नधर्मावच्छि
१६ न्नविशेष्यकंचज्ञानेप्रत्यप्रतिबंधकत्वेपिनक्षतिः एवंव्याप्यविशिष्टलौकिकसन्निकर्षाजन्यत्वादिकमपिनिवेशनेवान्यनान
रिक्तधर्मस्यैवप्रतिवध्यतावच्छेदकतापर्याप्त्यधिकरणतयासाध्यतावच्छेदकधर्मावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्र
कारताशालिबुद्धित्वपर्याप्तप्रतिवध्यतावच्छेदकताकत्वनिवेशेनैवसाध्यतावच्छेदकसंबंधनिवेशसार्थक्यात्तुव्यापकत्वनिवे
शाभिप्रायकतयातत्सार्थककथनमनुचितमितिवाच्यं धूमाभावादिसाध्यकस्थलेधूमाभाववत्त्वादिरूपसाध्यतावच्छेदक
संबंधावच्छिन्नप्रकारताशालिबुद्धित्वपर्याप्तप्रतिवध्यतावच्छेदकतायाअप्रसिध्यापत्तेः तत्रधूमत्वादिनाघटाद्यवगाहिभ्रम
संग्रहायधूमत्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारताशालिबुद्धित्वंपर्याप्तप्रतिवध्यतावच्छेदकतांगीकारात्घट
भिन्नंघटत्वाभावादित्यादौतादृशतादात्म्यसंबंधेनघटत्वरूपसाध्याभाववतिघटत्वादिहेतौसत्त्वादव्याप्तिरतस्वप्रकारकेतिप्रतिबं
धकविशेषणमितिसंक्षेपः॥ केचित्तुसाध्यतावच्छेदकसंबंधेनेत्यनुक्त्वायत्किंचित्संबंधेनसाध्यवत्ताज्ञानंप्रतीत्युक्तौकालि

कसंबंधावच्छिन्नद्रव्यत्वाभावेकालिकसंबंधेनसाध्येव्याप्तिःस्वरूपसंबंधेनसाध्यवत्ताज्ञानंप्रतिस्वरूपसंबंधावच्छिन्नसाध्या
भावस्यद्रव्यत्वस्वरूपतयाकालिकसंबंधेनतद्वत्ताज्ञानस्यप्रतिबंधकतयाकालिकसंबंधस्यापितथात्वात्तेनसंबंधेनकालस्यसा
ध्याभावाधिकरणत्वादतःसाध्यतावच्छेदकसंबंधेनेत्युक्तंनचसाध्यवद्भिन्नवृत्तित्वंसाध्यतावच्छेदकसंबंधसंसर्गकसाध्यवत्ता
ग्रहविरोधितानियामकसंबंधेनवक्तव्यमन्यथाकपिसंयोगसाध्यव्याप्तेःएवंचसाध्यवत्ताग्रहविरोधितानियामकयादृश
संबंधेनसाध्यवद्भिन्नवृत्तित्वमभावस्यतादृशसंबंधेनसाध्याभाववत्त्वमितिरीत्यासंबंधैक्यविवक्षणादुक्तद्रव्यत्वाभावसाध्यक
स्थलेकालिकसंबंधस्यसाध्यवद्भिन्नवृत्तितावच्छेदकतादृशसंबंधेनसाकमैक्याभावेनस्वरूपसंबंधस्यैवतथाविधतयाते
नसंबंधेनसाध्याभावाधिकरणमात्मेतिनाव्याप्तिरतःसाध्यतावच्छेदकसंबंधेनेतिव्यर्थमितिवाच्यंकालिकसंबंधावच्छिन्न
प्रतियोगिताकारकाग्रभावाभावादेःस्वरूपसंबंधेनसाध्येआत्मत्वादिहेतौकालिकसंबंधेनसाध्यवत्ताज्ञानंप्रतिस्वरूप
संबंधेनकालिकसंबंधावच्छिन्नसाध्याभावप्रकारकज्ञानस्यविरोधितयास्वरूपसंबंधस्यापितथात्वापातेनसंबंधेनसा

ध्याभावाधिकरणमात्मापीत्यव्याप्तिः तद्वारणाय साध्यतावच्छेदकसंबंधेवेत्यस्य सार्थक्यात् न चाधिकरणभेदेनाभावभेदान्नायं दोष इति
१७ वाच्यं तथापि कालिकसंबंधावच्छिन्नप्रमेयसामान्याभावे महाकालानुयोगिककालिकसंबंधेन साध्ये महाकालत्वहेतावव्याप्तिः
स्यात् स्वरूपसंबंधेन साध्यवत्ताग्रहं प्रति कालिकेन स्वरूपसंबंधावच्छिन्नसाध्याभावनिश्चयस्य विरोधितया कालिकसंबंधस्य ता-
दृशतया साध्यतावच्छेदकमहाकालानुयोगिककालिकसंबंधेन साध्यवद्भिन्नखंडकालवृत्तितावच्छेदकसंबंधतया वतेन सं-
बंधेन साध्याभाववत्त्वस्य काले सद्भावात्तद्वारकत्तयात्तस्यावश्यकत्वात् यद्विवविशेषरूपेण संसर्गतानेष्यते येन संबंधेन स्वप्रका-
रकमित्यत्र स्वस्वपदस्य साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिकाभावपरत्वेवेत्युच्यते तदा साध्यतावच्छेद-
कसंबंधेनेति व्यर्थमेवेत्यवधेयमित्याहुः ॥ नन्वेवमिति ॥ एवं तादृशसंबंधेन साध्याभाववत्त्वविवक्षणे ॥ तादृशसंबंधेनेति ॥ मूलावच्छिन्नवि-
शेषणतयेत्यर्थः ॥ एतेनाव्याप्यवृत्तित्वज्ञानकालिकत्वं तदभाववत्ताज्ञाने स्वावित्तं न लक्षणघटकं इति अपि तु निरवच्छिन्नविशेषणतेति नि-
षः ॥ अव्याप्यवृत्तिताज्ञानकाले तदभाववत्ताज्ञानस्य प्रतिबंधकत्ववारणाय अव्याप्यवृत्तिताज्ञानस्योत्तेजकत्वापेक्षया निरवच्छिन्न

विशेषणतया तदभाववत्तानिश्चयत्वेन प्रतिबंधकत्वे लाघवमिति हृदयं अव्याप्यवृत्तित्वस्थाने त्वन्यतादृशयां निरवच्छिन्नत्वा
नवगाहिनोपि तदभाववत्ताज्ञानस्य प्रतिबंधकत्वमनुभवसिद्धमतः। अव्याप्यवृत्तितास्थानस्यापि तेन कत्वमेवोचितं तथा च वृक्षादि
विशिष्टविशेषणतापि नादृशीति साध्यवद्भिन्नवृत्तीति सार्थकमिति समाधत्ते संयोगेति। अथ यादृशसाध्यवत्त्वे साध्याधिकरणे सा
ध्याभावस्य तदधिकरणे च साध्यस्य न भ्रमः प्रसिद्धः तत्र प्रसिद्धव्याप्यप्रतिबंधकभावकल्पनाया असंभवेन प्रतिबंधकताघटितल
क्षणस्याव्याप्तिरिति चेन्न तादृशस्थले मानाभावादिति हृदयं। वन्ह्यादिसाध्यकस्थलेषूक्तानुपपत्तिं प्रकारांतरेण वारयतां मतमाह
केचित्त्विति॥ साध्याभाववत्त्वाभावनिरूपितेति॥ साध्यनिरूपितत्वमर्थः॥ तथा च कथं न तु वन्ह्यादिसाध्यकस्थले साध्यनिरूपितप्रतियो
गिताप्रसिद्धिसंभावनावारणाय॥ द्रव्यत्वस्य हेतुतायां हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तितायाः प्रसिद्धिरतो द्रव्यत्वप्रकारकप्रमावि
शेष्यत्वेति॥ सत्ते तु व्यर्थमेवेति॥ घटाभावरूपेति॥ समवायसंबंधावच्छिन्नप्रमेयसामान्याभावस्य यो विशेषणतासंबंधावच्छि
न्नाभावस्तस्य प्रमेयमात्रस्वरूपत्वेन कालिकसंबंधावच्छिन्नघटाभावस्य साध्याभाववत्त्वाभावरूपत्वमित्याशयेनेदं बोध्यं॥ वस्तु

१८ नत्कसाध्यात्मकस्वाभावनिरूपितेत्यस्यसाध्यनिरूपितेत्यर्थकारणान्नानुपपत्तिर्लेशोपीत्यवधेयं॥साध्यनिरूपितस्वनिष्ठेतिवह्निमान्धूमा
दित्यादावन्यायाद्याभावस्ययःकालिकसंबंधावच्छिन्नाभावस्तन्निरूपितस्वनिष्ठप्रतियोगितावच्छेदककालिकसंबंधवारणायसाध्यनि
रूपितेतिप्रतियोगिताविशेषणंयावत्साध्यनिरूपितेति॥साध्यतावच्छेदकव्यापकानुयोगितानिरूपकेत्यर्थःतेनैकव्यक्तिकसाध्ययापक्षा
प्रसिद्धावपिनक्षतिः॥सर्वसमवायसंग्राहकेति॥एकैकसमवेतत्वरूपस्वाभिप्रायेणेदंसकलसमवेतत्वरूपत्वेतिगौरवंबोध्यंयत्किंचि
त्साध्येति॥यत्किंचित्त्वंयावत्त्वानिवेशस्फोरकं॥तादृशप्रतियोगितावच्छेदकवत्त्वसंबंधेनेतियत्पदानुक्तौकालिकसंबंधावच्छिन्नप्रमे
याभावस्ययोदैशिकविशेषणतयाभावस्तस्यापिसाध्यतयातन्निरूपितप्रतियोगितावच्छेदकदैशिकविशेषणतयासाध्यवद्भिन्नवृत्तेःसा
ध्याभावस्यतादृशकालिकसंबंधेनाधिकरणंकोपीत्यव्याप्तिःस्यादेवेतिभावः॥कालिकसंबंधावच्छिन्नेघभावप्रतियोगितावच्छेदक
कालिकसंबंधमादायसमवायेनप्रमेयसाध्यकेव्याप्तेः॥साध्यतावच्छेदकसंबंधेनवृत्तिमत्साध्यनिरूपितेसतितेनैववारणसंभवात्॥स्व
निष्ठत्वविशेषणस्यघटभिन्नंघटत्वाभावादित्यादावव्याप्तिवारणमेवप्रयोजनंवक्तव्यंतदपिनसंभवतिसंबंधैक्यविवक्षणादित्याहु

घटभिन्नमिति॥संयोगाभावाभेदासंभवेपीति॥नन्विदमसंगतंएतल्लक्षणेद्रव्यवृत्तिसंयोगाभावापेक्षयागुणवृत्तिसंयोगाभावस्यव्याप्यवृत्तेः
विभिन्नत्वेनसंयोगिभेदस्यगुणवृत्तिसंयोगाभावाभिन्नत्वेबाधकाभावात्॥नन्वद्रव्यवृत्तिसंयोगाभावाभेदासंभवेपीत्यर्थकंतदितिवाच्यं
तद्भेदस्यासंभवितत्वेननिषेधायोगात्गुणवृत्तिसंयोगाभावाभेदेबाधकाभावेनतदुपेक्षणस्यनिर्बीजत्वाच्चेतिचेन्नएवंलक्षणद्वयसाधा
रण्येनविचारस्यप्रसक्ततयासर्वसामंजस्यात्परेतुसमनियताभावानामैक्यमित्यस्यययोरनुयोगितयोःसमनियतत्वावच्छेदक
त्वंतयोरैक्याभावसमावेशोलाघवादित्यर्थइतिनेहाभावैक्यमित्याहुः॥द्रव्यत्वाभेदसंभवेपिकपिसंयोगिभेदादेःसाध्यत्वेतत्रक
पिसंयोगप्रकारकप्रमाविशेष्यत्वाभावाभेदएवानुसर्तव्यःअतःसर्वत्रतथाविधाभेदोचित्यमितिमनसिकृत्याहसंयोगवत्वेति॥
दैशिकविशेषणतायाःनिरुक्तरूपाक्रांतत्वप्रयुक्तस्थलेनाव्याप्तिःवक्ष्यमाणरीत्यासाध्याभावत्वविशिष्टाधिकरणतानिवेशाव
श्यंभावेनदैशिकविशेषणतयागगनाभावत्वविशिष्टाधिकरणतायाःहेतुमतिसत्वेपिसाध्याभावत्वविशिष्टाधिकरणतायाअसत्वा
त्॥अन्यथाआत्मनिकालिकसंबंधावच्छिन्नगगनाभावाभावोनास्तीतिप्रत्ययापत्तेः॥तथाचस्वनिष्ठत्वंव्यर्थमेवेतिचेन्न॥आत्म
निसाध्याभावत्वविशिष्टाधिकरणतायाःसत्वेपिनोक्तप्रत्ययप्रसंगः॥कालिकसंबंधेनगगनाभावाधिकरणतायाएवतादृ

प्रत्ययनियामकत्वादिति मतावलंबनेन स्वनिष्ठत्वसार्थक्यात्॥ नन्वेवमप्यधिकरणभेदेनाभावभेदादुक्तस्थले व्याप्त्यभावेन तद्व्य
१९ र्थमेवेति वाच्यं॥ अव्याप्यवृत्तिप्रतियोगिकाभावानामेव तथात्वेन गगनाभावादेरिति कल्पाभिप्रायकत्वेन तत्सार्थक्यात्॥ ननु साध्यनिरू
पितत्वनिष्ठप्रतियोगिनेत्यादिरूपे भावस्य संबंधे स्वपदार्थस्य न प्रवेशः स्वपदं तु स्ववृत्तिप्रतियोगिताघटित एव स्वस्य संबंधः॥ ना
न्यवृत्तिप्रतियोगिताघटितइत्येतत्सूचनाय परंपरासंबंधेप्येवमेष्टव्यत्वात्॥ तथा च यथाश्रुतार्थकसाध्यपदस्य पूर्वोक्तसा
ध्यप्रतियोगिकगगनाभावादिकरणासंभववस्य वारणरूपप्रयोजनं न संगच्छते साध्यनिरूपितप्रतियोगितायां गगनाभावादे
सत्त्वेन तस्य लक्षणाघटकत्वादित्याशयेन शंकते नन्वेति॥ साध्याभावेति॥ तद्घटकयथाश्रुतार्थकसाध्येत्यर्थः॥ अभावांतरे
पि॥ साध्याप्रतियोगिकगगनाभावादिरूपेत्यर्थः॥ तथा च संबंधांतरावच्छिन्नसाध्याभावादिनिष्ठसाध्यनिरूपितप्रतियोगि
तावच्छेदकसंबंधमादायाव्याप्तिवारकतया साध्यपदावश्यकत्वेपि गगनाभावादिवारणाय साध्यपदं व्यर्थमिति भावः॥ ननु ना
यं परंपरासंबंधः किंतु साक्षात्संबंधः एवं चान्यनिष्ठप्रतियोगिताघटितोप्यन्यस्य संबंधो भवत्येवातः साध्यपदस्य गगनाभावा
दिवारणरूपमपि प्रयोजनं संगच्छत इत्याशयेन समाधत्ते स्वपदार्थस्येति॥ स्वपदार्थस्य साध्याभावस्य द्विधा निवेशनं संबंधघट

कतयासाध्यवच्छिन्नवृत्तित्वविशेष्यतयाचेतिभावः परंपरासंबंधजन्मंवारयितुंस्वपदस्थानेसाध्याभावपदंयोजयतिसाध्याभावनि
ष्ठेतिवैयर्थ्यानवकाशादित्यत्रहेतुमाहतादृशसंबंधेनेति॥परेतुननुसाध्यवच्छिन्नसाध्याभावेत्यत्रसाध्यपदानुपादानेगगनाभा
वादेर्लक्षणघटकताऽभावपदेनतत्प्रतिपादनेस्वपदस्यसमभिव्याहृतपदप्रतिपाद्यपरामर्शकत्वेनसाध्यनिरूपितस्वनिष्ठत्व
त्वस्वपदेनतस्यैवपरामर्शनीयतयातन्निष्ठप्रतियोगितायाःसाध्यनिरूपितत्वविरहात्एवंचसाध्यपदंव्यर्थंनचसाध्यपदंव्यर्थ
नचसाध्यपदानुपादानेकालिकसंबंधावच्छिन्नाकाशाभावादिसाध्यकात्मत्वादिहेतुकस्थलेसाध्यतावच्छेदकसंबंधान्यकालि
कसंबंधावच्छिन्नसाध्याभावनिष्ठसाध्यनिरूपितप्रतियोगितावच्छेदकस्वरूपसंबंधेनतद्वृत्त्वमादायाव्याप्तेस्तादृशसाध्याभावस्या
व्याप्यवृत्तित्वेनाधिकरणभेदेनभिन्नत्वेनद्वारणेपिवह्न्यादिसाध्यकेन्यधर्मसंबंधावच्छिन्नवह्न्याभावनिष्ठप्रतियोगितावच्छेदक
संबंधेनतद्वृत्त्वमादायासंभवस्तद्वारकतयातत्सार्थक्यमेवेतिवाच्यंसाध्यतिष्ठानुयोगितायामेवसाध्यतावच्छेदकधर्मसंबंधावच्छि
न्नाभावनिरूपितत्वस्यापिनिवेशनीयत्वेनादोषादित्याशयेनाशंकतेनन्वेति॥साध्याभावेति॥तद्घटकविवक्षितार्थकसाध्ये
त्यर्थः॥अभावांतरेपि॥साध्यतावच्छेदकधर्मसंबंधावच्छिन्नाभावभिन्नेत्यर्थः॥साध्यनिरूपितत्वविरहेणैवेति॥साध्यतावच्छे

दकधर्मसंबंधावच्छिन्नाभावनिरूपितसाध्यनिष्ठानुयोगितानिरूपितत्वविरहेणैवेत्यर्थः॥ ननूक्तरीत्या दोषवारणसंभवेपि मूलोक्तसाध्यप
२० दसार्थक्याय साध्यनिरूपितस्वनिष्ठेत्यत्र स्वपदस्थाने साध्याभावपदमेव निवेशनीयं स्वपदस्यैव हि समभिव्याहृतपदप्रतिपाद्यपरा
मर्शकत्वनियमः किंच साध्यनिष्ठानुयोगितायां साध्याभावनिरूपितत्वं न देयमन्यथासिद्धमन्तं परित्यज्येति न्यायापत्तेः तथा च
साध्यनिरूपितसाध्याभावनिष्ठप्रतियोगितावच्छेदकस्वरूपादिसंबंधेन गगनाभावादिमत्त्वमादायासंभववारकतया साध्यपदसा
र्थक्यमिति समाधत्ते स्वपदार्थस्येति॥ साध्याभावत्वेनेति शेषः॥ ननु स्वपदस्य समभिव्याहृतपरोपस्थाप्यपराक्तत्वेन तत्स्वरूपसत्त्वेने
व साध्याभावस्य संबंधकटकतया प्रवेशस्यादित्याशंक्य स्वपदस्थाने साध्याभावपदं निवेशयाह साध्याभावेतीति व्याचष्टे॥ ननु
तथापि महाकालानुयोगिककालिकविशेषणतासंबंधेन प्रमेयस्य साध्यत्वे महाकालत्वादावव्याप्तिः निरुक्तसाध्याभावस्य
यः शुद्धकालिकसंबंधावच्छिन्नाभावत्वस्य प्रमेयत्वेन साध्यतया महाकालानुयोगिककालिकसंबंधेन वृत्तिमत्तया तत्
न्निरूपितसाध्याभावनिष्ठप्रतियोगितावच्छेदककालिकसंबंधस्य साध्यतावच्छेदकसंबंधेन साध्यवद्भिन्नखंडकालनि
रूपितवृत्तितावच्छेदकत्वेन तेन संबंधेन साध्याभावस्य महाकाले सत्वात् विशेषरूपेण संसर्गतायाअनभ्युपगमेनैतादृश

स्थलस्याप्रसिद्धत्वेपिद्रव्यवृत्तित्वविशिष्टाभावेस्वरूपेनसाध्येद्रव्यत्वादावव्याप्तिः निरुक्तसाध्याभावस्ययकालिकसंबंधावछिन्ना
भावः तस्यद्रव्यवृत्तित्वेनसाध्यतयास्वरूपसंबंधेनवृत्तिमत्तयाचतन्निरूपितसाध्याभावनिष्ठप्रतियोगितावछेदककालिकसंबंधेन
साध्यवद्भिन्नस्यंवृत्तेः साध्याभावस्यतेनसंबंधेनद्रव्यपिसत्वात्यावत्साध्यनिरूपेत्यस्यपूर्वंभट्टाचार्यैरेवदूषितत्वेनतथापरिष्कारासंभवा
त्तन्नवसाध्यनिरूपितत्वंचसाध्यवद्व्याववृत्तिव्यक्तिवृत्तिंवृत्त्यनुयोगिताकत्वंतच्चसाध्यतावछेदकतसंबंधेनसाध्यतावछेदकावछि
न्नव्यापकतावछेदकानुयोगिताकत्वंतेनैतद्रूपादिसाध्यकेनदोषः॥तथाचद्रव्यवृत्तिसाध्यव्यापकतावछेदकत्वस्यनित्यद्रव्य
मात्रवृत्तितादृशाभावनिष्ठानुयोगितायामसत्वान्नाव्याप्तिः अतएवसत्तातिरिक्तप्रमेयस्यसमवायेनसाध्यत्वेसाध्याभावावस्य
लाघवात्सत्तारूपत्वेपिसत्तानिष्ठानुयोगितायाएवसाध्यव्यापकतावछेदकत्वे त्यातन्निरूपितप्रतियोगितावछेदकः॥स्व
रूपसंबंधएवेतिनाव्याप्तिरन्यथासाध्यनिरूपितप्रतियोगितायाएवदौर्लभ्यप्रसंगादितिवाच्यं॥तथायुक्तदोषतादवस्थ्यात्
तथाहिद्रव्यवृत्तित्वरूपसाध्यतावछेदकविशिष्टस्यस्व रूपसंबंधेनयोभावः तस्यव्यतिरेकितयातस्यकालिकसंबंधाव ४
छिन्नप्रतियोगिताकाभावस्यकेवलान्वयित्वेनतन्निष्ठानुयोगितायाः साध्यतावछेदकविशिष्टव्यापकतावछेदकतायाअक्ष

सत्वाद्व्यतिरेकिणःकालिकसंबंधावच्छिन्नाभावस्यप्रतियोगिमत्यपिकालेतदनधिकरणदेशावच्छेदेनसत्वेनकेवलान्वयित्वस्यभट्टाचार्यैः
कंठरवेणासकृदावेदनीयत्वात्एवंकालिकसंबंधावच्छिन्नाकाशाभावाभाववानात्मत्वादित्यादौकालवृत्तित्वविशिष्टगगनाभावस्य
२१. स्वरूपसंबंधेनसाध्याभावत्वाभाववत्तस्यसाध्यसमनियततयासाध्यस्वरूपत्वेनतन्निरूपितप्रतियोगितायाःकालवृत्तित्वविशिष्टगग
नाभावनिष्ठायाःविशिष्टंशुद्धान्नातिरिच्यतइतिन्यायेनगगनाभावात्मकसाध्याभावनिष्ठत्वेनतदवच्छेदकस्वरूपसंबंधेनसाध्या
भावस्यास्यनिवृत्तेरव्याप्तिः॥नचतादृशप्रतियोगितावच्छेदकयत्संबंधेनसाध्यवद्भिन्नवृत्तित्वंलक्षणंतत्संबंधेनसाध्याभाववत्त्वस्यवि
क्षणान्नदोषइतिवाच्यं॥विषयितासंबंधेनप्रमेयसाध्यकगगननित्यज्ञानान्यतरत्वादाववृत्तिव्याप्तेःतत्रस्वरूपसंबंधस्यैवकालि
संबंधस्यापिसंग्रहसंभवेनतत्संबंधद्वयेनसाध्याभावाधिकरणकालेहेतोरसत्वादितिचेन्मैवं॥यतःसाध्यनिरूपितसाध्याभाव
निष्ठप्रतियोगितावच्छेदकयत्संबंधेनसाध्यवद्भिन्नमात्रवृत्तिःयःसाध्याभावःतेनसंबंधेनतद्वद्वृत्तित्वस्यविवक्षितत्वेननदो
षः॥अत्रमात्रपदंमितरव्यावर्तकंनभवतिमूलोक्तसाध्यपदवैयर्थ्यापत्तेः॥किंतुकृत्स्नार्थकंसाध्यवद्भिन्नत्वव्यापकसाध्याभावा
धिकरणावृत्तित्वमितितुनिष्कर्षः॥तथाचद्रव्यवृत्तित्वविशिष्टभावसाध्यकेद्रव्यत्वादिहेतौसाध्याभावस्यतादृशप्रतियोगि

तावच्छेदक।कालिकसंबंधेनस्यदादौसाध्यवह्नेर्देनसहविद्यमानत्वेपिसाध्यवह्निनेनित्येसत्येनसाध्यवह्नेर्दव्यापकत्वाभावेनस्वरूप
संबंधेनचतद्व्यापकत्वेनतस्यैवसंबंधस्यलक्षणघटकतयानाव्याप्तिः।कालिकसंबंधावच्छिन्नाकानाभावाभाववानात्मत्वादित्या
दौतिकालिकवृत्तित्वविशिष्टगगनभावाभावः।कालत्वाभावएवेतितन्प्रतियोगितायाःस्वरूपसंबंधावच्छिन्नायाःगगनाभावेसत्वे
नदोष।वह्निमान्धूमादित्यादौगगनभावादेःसाध्यतावच्छेदकान्यधर्मसंबंधावच्छिन्नप्रतियोगिताकाभावादेश्चवारणायमूलो
क्तसाध्यपदसार्थकतादृशाभावानांतादृशप्रतियोगितावच्छेदकस्वरूपसंबंधेनसाध्यवह्निमत्वव्यापकत्वेनलक्षणघटकत्वात्
साध्यनिरूपितस्यस्यप्रयोजनंनुकालिकसंबंधावच्छिन्नाकाशाभावाभावसाध्यकस्थलेगगनरूपितागगनभावनिष्ठप्रतियोगिता
वच्छेदकस्वरूपसंबंधवारणरूपंबोध्यं।।सत्तान्यप्रमेयसाध्यकेजातिप्रकारकप्रमाविषयत्वादौपूर्वोक्तएत्यासासाध्यनिरूपित
प्रतियोगित्वाप्रसिध्याव्याप्तिवारणायसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकानुयोगितानुरूपितत्यादिरात्यापरिष्करणीय
तयासाध्यतावच्छेदकसंबंधेनसाध्यव्यापकतालाभार्थमेवसाध्यतावच्छेदकसंबंधेनवृत्तिमवितिविशेषणं।।साध्याभावनिष्ठ

त्वेत्यादेः प्रयोजनं पूर्वोक्तमेवेत्यलमतिविस्तरेण ॥ परे तु सत्तान्यप्रमेयाभावाभावः द्रव्यत्वगुणत्वकर्मत्वान्नितयरूप एव न तु सत्तारूपः प्रति
२२ योगिन एवाभावाभावत्वस्वीकारात् तथा च सत्तान्यप्रमेयसाध्यके साध्यनिरूपितप्रतियोगिताप्रसिद्धेतिनाव्याप्तिरित्याहुः ॥ आहुरित्य
स्वरसस्तु नाथः तद्वीजं तु कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभाववानात्मत्वादित्यादावव्याप्तिः कालत्वाभावस्य सा
ध्यसमनियतत्वतया तदैक्येन कालत्वस्यापि साध्याभावात्मकत्वेन तन्निष्ठप्रतियोगितावच्छेदकस्वरूपसंबंधस्य लक्षणघटकत्वात्
यद्विसाध्यनिरूपितयन्निष्ठप्रतियोगितावच्छेदकयत्संबंधेन साध्यवद्भिन्नवृत्तेस्तस्य साध्याभावस्य तेन संबंधेनाधिकरणेत्यादि
रर्थः मूलोक्तसाध्यपदं तु साध्यतावच्छेदकान्यधर्मसंबंधावच्छिन्नाभावस्य वारणाय न तु गगनाभावादेः साध्यनिरूपितप्रतियोगि
तायास्तित्वासत्त्वात् तावतापि तु स्य सार्थक्यादित्यत्र्व्याये तु दाताद तस्येन घटसाध्यकस्थले व्याप्तिः घटभेदाभावस्य घटस्वरूपत्वेन सा
ध्यनिरूपितसाध्याभावनिष्ठप्रतियोगितायाअप्रसिद्धत्वात् न च भेदाभावस्य प्रतियोगिरूपत्वमपीतिनायं दोष इति वाच्यं अभा
व विरहात्मत्वं वस्तुनः प्रतियोगितेत्याचार्याणां प्रतियोगितालक्षणस्यान्योन्याभावप्रतियोगिन्यव्याप्तिं वदतां दीधितिकृतां प्र

तियोगितावच्छेदकरूपत्वस्यैवसंभवत्वेनतद्दोषतादवस्थ्यादितिदिक्॥ यादृशसंबंधेनेत्यादिनन्वत्रप्रकृतसाध्यवन्निरूपितयादृश
संबंधावच्छिन्नवृत्तित्वाभावान्साध्यवद्भिन्नवृत्तित्वोपलक्षितसाध्याभावइत्यर्थोनसंभवतिकालिकसंबंधावच्छिन्नाकाशाभावा
भावादिसाध्यकस्थलेकालिकसंबंधासंग्रहप्रसंगात्साध्यवतितेनसंबंधेनकस्याप्यवृत्तेः॥ तादृशसाध्याभावस्यसाध्यवद्वृत्तित्व
यादृशसंबंधानवच्छिन्नमित्यर्थइत्यपिनआत्मत्वादिसाध्यकेसाध्याभावेसाध्यवन्निरूपितवृत्तित्वाप्रसिद्धेः नापियत्संबंधावच्छिन्नंसा
ध्याभावनिष्ठाधेयत्वंसाध्यवदनिरूपितमित्युक्तेविशिष्टसत्ताभावेसाध्येगुणत्वादिहेतौसमवायासंग्रहात्सत्तारूपसाध्या
भावनिष्ठाधेयतायाःसाध्यवदनिरूपितत्वविरहात्॥ नन्वतादृशसाध्याभावत्वविशिष्टनिरूपितयादृशसंबंधावच्छिन्नाधिकर
णतासामान्यस्यसमवायावच्छिन्नस्यसमवायावच्छिन्नस्यसाध्यवद्वृत्तित्वसत्वेनसमवायसंग्रहः सामान्यपदनिवेशेनवह्निमान्धू
मादित्यादौवह्न्यभावाधिकरणतायाःकालिकसंबंधावच्छिन्नायाःकस्याश्चिद्वह्निमत्यसत्वेपिनकालिकसंबंधसंग्रहइतिवा
च्यंतादृशाधिकरणतासामान्यंसाध्यवद्वृत्तीत्यस्यतादृशाधिकरणतात्वव्यापकःसाध्यवद्वृत्तित्वाभावइत्यर्थपर्यवसितत्वेनात्रा
पिवाग्जालरूपदोषस्यप्रसक्ततयापूर्वकल्पद्वयेरुन्विप्रदर्शकस्यालवाग्जालेनेत्यग्रिमग्रंथस्याजस्यनासंगतेरितिचेन्नयादृश

संबंधेनतादृशसाध्याभाववत्वविशिष्टानधिकरणंप्रकृतसाध्यवदित्यर्थस्यविवक्षितत्वेनादोषात्नचतादृशसाध्याभाववत्वविशि
२३ ष्टानधिकरणंप्रकृतसाध्यवदित्यर्थस्यविवक्षितत्वेनादोषात्नचतादृशसाध्याभाववत्वविशिष्टानधिकरणंयावत्साध्यवदितिवक्त
व्यमन्यथाद्रव्यत्वादिसाध्यकसद्धेतौकालिकसंबंधेनतादृशसाध्याभावाधिकरणंयत्तद्भेदस्ययत्किंचित्साध्यवतिसत्वेनका
लिकसंबंधस्यापिसंग्रहापातात्तथाचोक्तदोषोदुर्वारएवेतिवाच्यंनञादिसमभिव्याहारस्थलेप्रतियोगिवृत्तिधर्मएवस्वरूप
संबंधरूपस्यभेदानुयोगितावच्छेदकत्वस्यव्युत्पत्तिसिद्धत्वात्कालिकसंबंधेनसाध्याभावाधिकरणभेदानुयोगितावच्छेद
कत्वस्यप्रतियोगिवृत्तिसाध्यसंभवेनकालिकसंबंधासंग्रहेणस्वरूपसंबंधस्यैवसंग्रहात्नचात्माज्ञानत्वाद्यन्यतरस्मादि
त्यादौकालिकसंबंधस्यलक्षणघटकतापत्त्यातिव्याप्तिरितिभ्रमितव्यं॥एतत्परिचयसंबंधेनसाध्याभावाधिकरणवृत्ति
त्वसामान्याभावस्यैवविवक्षितत्वेनतादृशस्वरूपसंबंधेनसाध्याभावाधिकरणवृत्तित्ववतिहेतौतत्सामान्याभावस्यसत्वेना
तिव्याप्त्यसंस्पर्शात्परिचायकरूपसाध्यवद्भिन्नवृत्तिपदंमूलोक्तसाध्यवद्भिन्नपदसार्थक्यायअन्यथाकपिसंयोगसाध्यक
स्थलेतादृशसंबंधानिरवच्छिन्नदैशिकविशेषणतैवस्यादितिमूलोक्तसाध्यवद्भिन्नपदस्यव्यावर्तकत्वापत्तेरितिध्येयंनिरवच्छि २३

न्नसाध्याभाववत्तानिवेशेप्रथमलक्षणेव्याप्त्यभावादाह एतल्लक्षण इति॥ अत्रतथापरिष्कारोनसंभवतीत्यनुपदमेवस्फुटीभवि
भय। ष्यति॥ अन्यतराभाववानिति॥ घटत्वघटाकाशसंयोगोभावस्यकेवलान्वयित्वान्नस्यसाध्यत्वोपेक्षणं॥ निरवच्छिन्नेति॥ संयोगिभिन्नं
गुणत्वादित्यादौसंयोगप्रकारकप्रमाविषयत्वस्यापिसाध्याभाववत्ताप्रसिद्धेतिनाव्याप्तिरितिभावः॥ ननुसाध्यवद्भिन्नेत्यनेननिरवच्छि
न्नवृत्तिकेत्यर्थस्यविवक्षणाद्घटत्वघटाकाशसंयोगान्यतराभावेसाध्येतदभावस्यघटाकाशसंयोगादिरूपत्वेपिनक्षतिरितिवदंतं
प्रत्याहसाध्यवद्भिन्नइति॥ स्कन्धादाविति॥ ईश्वरेनित्यस्कन्धान्यंगीकारादिदं॥ तदंगीकर्तृमतेतुदुःखादिमत्त्वमेवहेतुरितिध्येयं॥ प्र
सिद्धघटपक्षकेव्याप्तिमाह उत्पत्तिकालावच्छिन्नेति॥ अव्याप्तिश्चेति॥ स्वमतेतूक्तस्थलद्वयेसाध्याभावस्यप्रतियोगिवैयधिकरण्यादि
रूपविरुद्धधर्माध्यासेनज्ञानत्वसत्वाद्यपेक्षयाविभिन्नत्वेनाधिकरणभेदेनभिन्नत्वान्नाव्याप्तिरितिभावः॥ कर्मादाविति॥ यद्यप्यत्र
दीधितिकृतांगुणादावित्येतदुक्तिरेवोचितातथापिकर्मणआदिःकर्मादिरितितत्पुरुषउतबहुव्रीहिर्वास्वीक्रियतास्कन्धयथापिन
क्षतिरितिवैचित्र्यसूचनायेदमितिध्येयं॥ परेतुकस्याचिन्मतेद्रव्यकर्मगुणेत्यादिसूत्रपाठान्मताभिप्रायकमिदमित्यंचकर्मणिन्वसं
योगाभावःप्रतियोग्यसमानाधिकरणइत्यग्रिममूलानुरोधोपिसंगच्छतइत्याहुः॥ दीधितिकारोक्तंमानाभावंखंडयतिइदंत्वेवेति॥

सप्रमाणएवेति॥लाघवरूपप्रमाणसहितइत्यर्थः॥धर्मिणां॥अधिकरणभेदेनभिन्नसंयोगप्रकारकप्रमाविषयत्वाभावद्रव्यत्वाभावादीनां।
 उक्तेति॥लाघवेरूपेत्यर्थः॥ननुपूर्वोक्तरीत्यालाघवासंवेपिनिगमनाविरहस्थलेसिद्धंचेदुभयंसिध्यतीति।न्यायेनानंताधिकरणेषुअ
तिरिक्तसंयोगाभावस्येवक्लृप्तानंताभावेषुसंयोगाभावत्वस्यकल्पनानिर्विधिकेतिसमाधत्तेविनिगमनाविरहेणेति॥ननुक्लृप्ताभा
वेषुसंयोगाभावत्वकल्पनेधर्म्यकल्पनाप्रयुक्तलाघवमस्त्वतमेवेतिभ्रमितव्यं॥द्रव्येक्लृप्तगुणत्वाद्यभावस्यव्याप्यवृत्तित्वेनतत्रा
व्याप्यवृत्तिसंयोगाभावत्वकल्पनासंभवेनसंयोगाभावरूपधर्मिकल्पनायाआवश्यकत्वादुक्तलाघवानवकाशात्॥ननुतथापि
तदधिकरणेततदधिकरणवृत्त्यभावेचसंयोगाभावसंबंधकल्पनापेक्षयाक्लृप्ताभावेषुसंयोगाभावत्वकल्पनेवरमितिवाच्यंभवन्म
तेपितत्तदभावेसंयोगोनास्तीतिप्रतीत्यनुरोधेनतत्तदभाववृत्तिद्रव्यत्वाभावेसंयोगाभावत्वकल्पनायाआवश्यकत्वेनसाम्या।
त्॥अत्रेदमवधेयं॥एतावतासंयोगाद्यभावस्यभिन्नत्वेमानाभावादित्युक्तिनिराकरणमात्रंनत्वव्याप्तिःसिध्यति॥गुणवृत्तेरखं
डसंयोगाभावस्यद्रव्येपिसत्वादिति॥वह्निमान्धूमादित्यादौसाध्यवत्पक्षभेदमादायाव्याप्त्यभावादाहनानाधिकरणेति॥ननुसाध्यव
त्पक्षभिन्नदृष्टांतेत्यत्रपक्षपदानुपादानेसाध्यवद्भिन्नत्वंहेतुमतिदृष्टांतेवाधितंभिन्नादिपदसमभिव्याहारस्थलेन्यतावच्छेदकावच्छि

न्नप्रतियोगिताकभेदबोधस्यैवव्युत्पत्तिसिद्धत्वादतः साध्यवद्यत्किंचित्प्रतियोगिकभेदतात्पर्यलाभायपक्षपदमितिवक्तव्यं एवं चै
काधिकरणकहेतावपिसाध्यवद्यत्किंचित्प्रतियोगिकभेदमादायाव्याप्तिसद्भावान्नानाधिकरणस्येतिपूरणमनुचितमितिचेन्मै
वं पतः पक्षपदंनोक्ततात्पर्यकमपितुलक्षणघटकीभूतसाध्यवच्छिन्नप्रतियोगितायांपक्षनिष्ठत्वनिवेशतात्पर्यकमन्यथासाध्यवद्यत्किंचि
द्भिन्नदृष्टांतेत्येववदेत्तथाचतादृशभेदमादायैकाधिकरणकहेतौनाव्याप्तिरितिनानाधिकरणकस्येतिपूरणमुचितमेवनचैवंलक्षणे
साध्यवत्पदंव्यर्थमितिवाच्यं॥व्याप्तिसाध्यघटितत्वायतत्कृदेववह्निमान्धूमादित्यादावतिव्याप्तिवारणायचसार्थक्यात्॥एतेनक
पिसंयोगैतद्वृक्षत्वादित्यादावव्याप्तिवारणायदीधितिकृतैवतल्लक्षणस्यावतारितत्वेनात्रापिवृक्षांतरवृत्तिकपिसंयोगवद्भे
दमादायाव्याप्तेर्दुर्वारत्वादसंगतिरितिपरास्तं॥वृक्षांतरवृत्तिकपिसंयोगवद्भेदस्यपक्षप्रतियोगिकत्वाभावेनलक्षणाघटकत्वा
दव्याप्त्यभावेनासंगत्यभावात्॥अत्रेदंबोध्यंसाध्यतावच्छेदकविशिष्टावच्छिन्नभेदघटितस्यैवव्यभिचारपदार्थतयाएतल्लक्षणस्य
तदभावरूपत्वासंभवेनाव्यभिचरितत्वपदार्थत्वानुपपत्तिरूपदोषस्यस्फुटत्वेप्यव्याप्तिरूपदोषस्यैवप्रबलत्वेनतदुद्भावनमेवकृतमि
तिप्रयोगितायांव्यासज्यवृत्तिधर्मानवच्छिन्नत्वंपसमानाधिकरणभेदप्रतियोगितावच्छेदकधर्मानवच्छिन्नत्वरूपमेववाच्यमे

मेतदपेक्षयाभेदप्रतियोग्यवृत्तित्वविशेषणमेवलघीयइत्यभिप्रेत्यतदेवाहप्रतियोग्यवृत्तित्वेनेति॥प्रतियोग्यवृत्तित्वंचस्वनिरूपकत्वसमाना
२५ धिकरण्योभयसंबंधेनप्रतियोगिताविशिष्टान्यत्वस्वरूपंबोध्यं॥किंचित्पूर्वक्षणावच्छिन्नैतद्रूपवद्देवारणायप्रतियोग्यवृत्तित्वेनेतीत्याकूतः॥
साकल्यस्यविशेषणतांस्पष्टयितुमाहविशेषणमित्यादिरिति॥ननुदीधितिकृताप्रथमतःसाध्यएवसाकल्यंकिमितिनप्रदर्शितमित्यत्रबीज
माहात्रेतिवक्ष्यमाणप्रयोजनस्यैवेति॥नानाव्यक्तिसाध्यकाव्याप्तिवारणरूपस्यैवेत्यर्थः॥वास्तवत्वयेति॥आवश्यकविशेषणतानिर्वाह
त्वेनेत्यर्थः॥तस्यवास्तवप्रयोजनस्य॥विशेषणस्यएवेति॥अव्याप्तिवारणरूपवास्तवप्रयोजनस्यसाध्याभाववत्तिसाकल्यंविनानुपपत्तिरिति
भावः॥ननुसाध्याभाववत्तिसाकल्यप्रवेशंविनापिसाध्येसाकल्यस्यमुख्यप्रयोजनमायास्यत्येवतथाहिसाध्येसाकल्याप्रवेशेएतद्रूपग
गनोभयवानेतद्व्यक्तित्वादित्यादावतिव्याप्तिःएतद्रूपगगनोभयाभावस्यप्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणत्वाभावेनैतद्रूपा
भावस्यैवप्रतियोगिव्यधिकरणतयातद्भिन्नाभावप्रतियोगित्वस्यहेतौसत्वात्साध्येसाकल्यप्रवेशेचप्रतियोगिव्यधिकरणसकलसा
ध्याभावाप्रसिध्यानातिव्याप्तिः॥नचसाध्येसाकल्यनिवेशेप्येतद्रूपगगनान्यतराभावमादायातिव्याप्तिवारणायप्रतियोगिवैयधिकरण्य
शरीरेप्रतियोगितावच्छेदकवैशिष्ट्यसाध्यतावच्छेदकताघटकसंबंधेननिवेशनीयतथातत्रैतद्रूपाभावस्यसाध्यतावच्छेदकताघट

ताघटकपर्याप्तिसंबंधेनप्रतियोगितावच्छेदकविशिष्टासंभवेनलक्षणाघटकतयासाध्यसाकल्यस्यनोक्तरीत्याप्रयोजनलाभइतिवाच्यं।
तथाप्येतद्रूपरसोभयाभावमादायातिव्याप्तेर्व्याप्तेर्घादुर्वारत्वेनतद्वारणरूपप्रयोजनस्यसंभवात्॥ नचसाध्यसाकल्यप्रवेशेपिपटावृत्तित्वाव
च्छिन्नाभावमादायातिव्याप्तिरस्त्येवेतिभ्रमितव्यमुक्ताभावस्यसाध्यतावच्छेदकताघटकसंबंधेनप्रतियोगितावच्छेदकविशिष्टवैयधिक
रण्यानाक्रांतत्वात्॥ एतेनतद्रूपवद्वृत्तित्वावच्छिन्नाभावमादायातिव्याप्तिवारणप्रकारोपिनिरस्तइतिचेन्नसाध्याभाववतिसाकल्ये
नाप्येतद्रूपवद्वृत्तिद्रव्यत्वोभयाभावस्यसाध्यप्रतियोगिकत्वेनोक्तप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याक्रांतत्वेनचतमादायातिव्या
प्तिवारणसंभवात्तद्वारणस्यमुख्यप्रयोजनत्वासंभवात्॥ एतेनघटत्वप्रकारकप्रमाविशेष्यत्वघटावृत्तिधर्मोभयस्मिन्साध्येएतत्वादित्या
वतिव्याप्तिवारणायसाध्यसाकल्यंनिवेशनीयंतथासति॥ पटावृत्तित्वावच्छिन्नाभावस्यनिखिलसाध्याप्रतियोगिकत्वेनलक्षणाघटक ४
तयाप्रतियोगिव्यधिकरणसकलसाध्याभावस्याप्रसिध्यानातिव्याप्तिरित्तिनिरस्तंविशेषरूपेणसंसर्गतायाअनभिमतत्वस्यासकृ ५
दावेदनीयत्वेनतादृशस्थलस्यैवाप्रसिद्धेःसाध्यसाकल्यानिवेशेपिसाध्यतावच्छेदकताघटकसंबंधघटितनिरुक्तप्रतियोगिव्यधि

करणत्वाक्रांतसाध्यप्रतियोगिकाभावाप्रसिद्ध्यैवानतिप्रसंगेनोक्तप्रयोजनासंगतेश्च॥ किंचसाध्याभाववत्तिसाकल्यप्रवेशेसाध्याभा
वेप्रतियोगिवैयधिकरण्यस्यैवाव्यावर्तकत्वेनानुपादेयतयोक्तरीत्यासाध्यसाकल्यस्यव्यावृत्तिर्नसंभवतीतिध्येयं॥ अथसाध्याभावव
२६ त्तिसाकल्यनिवेशानंतरंप्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकेनसाध्यसाकल्यकल्पेपूर्वोक्तेतद्रूपगगनोभयसाध्यकेतत्वावतिव्या
प्तिः एतद्रूपगगनान्यतरस्योभयाभावस्यैतद्रूपतद्भिन्नोभयाभावस्यचसकलसाध्यप्रतियोगिकत्वेननिरुक्तप्रतियोगिवैयधिकर
ण्याक्रांततथाचलक्षणघटकत्वादितिचेन्नपटत्वतद्भिन्नोभयाभावस्यएतद्घटावृत्तित्वात्तद्घटाद्युक्तोभयाभावस्यापिचल
क्षणघटकत्वेनातिव्याप्त्यनवकाशात्॥ वस्तुतस्तूभयाभावःपरंपरयोभयत्वाभावएवेतिमताभिप्रायेणैवायंकल्पः अन्यथादि
धितिकारस्यात्यंतमसंगतप्रलपनापत्तेः उभयाभावमादायदोषस्यातिस्फुटत्वात् उभयाभावस्वीकर्तृसिद्धांतमताभिप्रायकम
न्निकल्पावतारणमितिनासंगतिः ननुचैवमुभयसाध्यकस्थलेनिरुक्तप्रतियोगिव्यधिकरणसकलसाध्याभावाप्रसिद्धि
रितिनाशंकनीयं॥ उभयसाध्यकस्थलेपरंपरयोभयत्वस्यैवसाध्यतास्वीकारेणादोषात्॥ एवंचनकोपिदोषगंधइतिध्येयं॥

यद्येकविपक्षकसत्वेत्वनुरोधेनसाध्याभाववतिसाकल्यंनदीयतेसाध्यादिभेदेनव्याप्तेर्भेदात्॥अतएवस्वरसादितिकृतानिधू
मत्वव्याप्तित्यादिनास्थलांतरमनुसृतंतथाचगगनावृत्तिधर्मवान्द्रव्यत्वादित्यादौघटत्वादिलक्षणातत्साध्याभाववद्गुणादिनि
ष्ठाभावप्रतियोगिनिद्रव्यत्वादावतिव्याप्तिरतस्तद्वारणरूपंसाध्यसाकल्यस्यमुख्यप्रयोजनमायास्यत्येवेतिकश्चिद्ब्रूयात्तदाप्याह।
वस्तुतस्त्विति॥अविवक्षितत्वेति॥साध्यतावच्छेदकावच्छिन्नाभावकल्पेपिव्यभिचारिण्यतिव्याप्तिवारणायविपक्षेसाकल्यस्याव
श्यकत्वादितिभावः॥वह्निमान्धूमादित्यादावव्याप्तिवारणायसार्वभौमेनसाध्याभावेसाकल्यंनिवेशितंतदुपेक्षयांबीजमाह॥अ
व्याप्तिवारणायेति॥वह्निसामान्याभावस्यापिलक्षणघटकत्वादितिभावः॥अतिव्याप्तिरिति॥एतेनकृत्याधिकरणाप्रसिध्यानाप्ति
व्याप्तिरितिवदतोनिरासः॥प्रतियोगितावच्छेदकसंबंधेनप्रतियोगिवैय्यधिकरण्यस्यैवदीधितिकृतोभिमतत्वस्यव्यवस्थापनीय॥
तयासाध्याभावप्रतियोगितायासाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशस्यावश्यकत्वात्॥अतएवासंभवेपिनसंभवतीत्यभिप्रेत्या
स्त्वव्याप्तिश्चेतिपर्वतीयवह्नेर्हृदत्वादिनेति॥वह्निघटोभयाभावादेःपर्वतीयवह्निप्रतियोगिकत्वामपीतिस्फुटीकरणायपर्वतीये॥

तिन्नतुपर्वर्तीपत्वस्यप्रतियोगितावच्छेदककोटिप्रवेशालाभायान्यथानिखिलवन्ह्यप्रतियोगिकत्वेनलक्षणघटकत्वानुपपत्तेः॥
२७ एतल्लक्षणान्यलक्षणवृत्तित्वविशिष्टवन्ह्यभावस्यसकलसाध्यप्रतियोगिकत्वेपिप्रतियोगिवैयधिकरण्यविशिष्टतदधिकरणतानहेतु
मतइतितदुपेक्षा॥विशेषणेनेति॥वन्हिधूमोभयसाध्यकसद्धेतौतादृशान्यतराभावमादायलक्षणसमन्वयइतिभावः॥अतएवाति
व्याप्तिमाह॥वन्हिधूमोभयवानिति॥नन्वयोगोलकान्यत्वविशिष्टवन्हिधूमान्यतराभावस्यसकलसाध्यप्रतियोगिकत्वाभावेपि
यादृशायोगोलकीयवन्हिः तत्रान्यत्वमस्तितादृशायोगोलकान्यत्वविशिष्टवन्हिधूमान्यतराभावमादायनातिव्याप्तिरितिध्य
मितव्यं॥तादृशान्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टवतितदयोगोलकेतादृशाभावस्यस्थातुमनीशत्वेनातिव्याप्तेःसुस्थ
त्वात्॥यद्यन्यतराभावस्यसाध्यतावच्छेदकताघटकसंबंधेनप्रतियोगितावच्छेदकविशिष्टाप्रसिध्यालक्षणाघटकत्वयानातिव्या
प्तिरित्युच्यतेतदावन्हिधूमोभयसाध्यकसद्धेतावव्याप्तिरेवेतिध्येयंसाध्यतावच्छेदकातिरिक्तइति॥साध्यतावच्छेदकेतरधर्मा
नवच्छिन्नत्वनिवेशोगुरुधर्मस्यानवच्छेदकत्वेकंबुग्रीवादिमत्वाद्यवच्छिन्नसाध्यकेघटत्वाद्यवच्छिन्नाभावासंग्रहेणाव्याप्तिः

स्यादतोव्याप्तत्र्यवृत्तित्वंधर्मेविशेषणं॥ननुसंयोगादिनाप्रमेयवत्साध्यकेसाध्यतावच्छेदकातिरिक्तत्वाप्रसिध्यायादृशंसाध्यतावच्छेदकंतदवच्छिन्नप्रकारतावच्छेदकत्वरूपस्यसाध्यतावच्छेदकातिरिक्तत्वस्यनिवेशनीयतयाप्रमेयवह्निधूमोभयसाध्यकेव्याप्तिःनिरुक्तप्रतियोगिव्यधिकरणसमवायेनवह्निधूमोभयत्वविशिष्टसाध्यकपर्याप्तिसंबंधेनोभयत्वविशिष्टाभावमादायाव्याप्तिवारणायसाध्यतावच्छेदकाघटकसंबंधेनप्रतियोगितावच्छेदविशिष्टत्वादेर्विवक्षणीयतयावह्निधूमान्यतराभावादेर्लक्षणघटकत्वेतिभावःसकलसाध्याभावानादृशाप्रसिद्धेरितिचेन्नयतःसाध्यतावच्छेदकातिरिक्तत्वंसाध्यतावच्छेदकधर्मानवच्छिन्नप्रकारतावच्छेदकत्वरूपंसाध्यतावच्छेदकघटकत्वंचस्वाविषयकप्रतीत्यवृत्तितादृशसाध्यतावच्छेदकविषयिताकत्वंएवंचवह्निधूमोभयाभावस्यतादृशत्वेनतमादायोक्तस्थलेलक्षणसमन्वयइतिदिक्॥वस्तुतस्तुगुरुधर्मस्यप्रतियोगितावच्छेदकत्वाभिप्रायकोग्रंथः॥एवंचाव्याप्तिशंकैवनावतति॥साध्यसाकल्यनिवेशसार्थक्यायव्यासज्यवृत्तीति॥अखंडाभावघटकतयातस्यसार्थक्यात्॥उक्तप्रयोजनानुरोधेनसाध्यतावच्छेदकातिरिक्तत्वस्यपरिष्करणीयतयासामानाधिकरण्यसंबंधेनमहानसीयत्वविशिष्टवह्नित्वंतदवच्छिन्नाभावादीनामपिवारणसंभवात्॥अतएवकंबुग्रीवादिमत्पटोभयसाध्यकेघटपटोभयाभावस्यलक्षणाघटकत्वेपिनाव्याप्तिः॥कंबुग्रीमादिमत्पटो

भयत्वावच्छिन्नाभावस्यैवलक्षणघटकत्वादितिध्येयं॥लाघवादिति॥साकल्यादिनिवेशापेक्षयेत्यादिः॥एतेनगुरुधर्मस्यप्रतियोगितावच्छे
दकत्वेतदवच्छिन्नसाध्यकस्थलानुरोधेनसाध्यतावच्छेदनवच्छिन्नत्वस्थानेसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्न
२८ त्वनिवेशेपिलाघवमक्षतमेवेतिसूचितं॥पारिभाषिकसाध्यतावच्छेदकेतरत्वव्याप्यज्यवृत्तित्वञ्चेत्यनिवेशनमादिपदार्थः॥एतद्रूप
तद्रूपोभयेतिरूपकपालत्वोभयत्वावच्छिन्नाभावस्यप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणस्यसाध्यप्रतियोगिक
स्यवारणायप्रतियोगितायांसाध्याभाववद्वृत्तित्वंविशेषणंदेयमित्याशयः॥परेतुप्रतियोगिवैयधिकरण्यशरीरसाध्यतावच्छे
दकताघटकसंबंधेनप्रतियोगितावच्छेदकवैशिष्ट्यंनिवेशनीयमन्यथासमवायसंबंधेनवह्निधूमोभयत्वावच्छिन्नेसंयोगेनसाध्येवह्निरू
पमहानसेपर्याप्तिसंबंधेनवह्निधूमोभयत्वविशिष्टाभावस्यप्रतियोगितावच्छेदकताघटकसंबंधेनप्रतियोगितावच्छेदकावच्छि
न्नव्यधिकरणस्यसाध्येसाकल्यनिवेशेपिलक्षणघटकतयाव्याप्तेः॥तथाचरूपकपालत्वोभयत्वावच्छिन्नाभावस्यतादृशेनस
मवायेनापेक्षाबुद्धिविशेषविषयत्वरूपोभयत्वविशिष्टाप्रसिद्ध्यालक्षणघटकत्वाक्षतेः॥लक्षणसंगतेरिति॥अत्रायमा
शयःद्रव्यंपृथिवीत्वादित्याद्येकव्यक्तिसाध्यकेप्ययत्किंचिद्व्यक्तित्वविशिष्टद्रव्यत्वाद्यभावादिनावैशिष्ट्यमवच्छिन्न २८

प्रतियोगिताकत्वविशेषणदानेनवारणाल्लक्षणसमन्वयः अतएवनानाधिकरणकसाध्येत्यनुक्त्वानानाव्यक्तिसाध्यकेत्वाक्रांदे
ल्ककवान्दीधितिकृदिति॥अतएव॥एकव्यक्तिसाध्यकेवलक्षणसमन्वययादेवः॥नानाव्यक्तिसाध्यकत्वाक्रांतेवलक्ष्यमाणस्थ
लेव्याप्तिविरहादवच्छेदकावच्छेदनविधेयान्वयनियमभंगइतिनानाव्यक्तिसाध्यकत्वंपरिष्कृतेतिव्यधिकरणद्वयेति॥ननुकिमिदं
साध्यतावच्छेदकेव्यधिकरणद्वयवृत्तित्वं॥नतावद्यत्किंचित्साध्यानधिकरणवृत्तिवृत्तित्वंद्रव्यत्वपृथिवीत्वान्यतर~त्वान्पृथि
वीत्वादित्यादावनुद्देश्यतावच्छेदकाक्रांतेलक्षणसंगमनाउक्तनियमभंगापत्तेः॥नचपरस्परानधिकरणवृत्तिवृत्तित्वमेतत्॥तत्र
स्वसमानाधिकरणाभेदप्रतियोगितावच्छेदकवृत्तित्वस्वावच्छिन्नप्रतियोगिताकभेदवद्वृत्तिवृत्तित्वोभयसंबंधेनकिंचित्साध्यवि
शिष्टत्वरूपमेववोक्तान्यतरत्वरूपसाध्यतावच्छेदकस्यैतादृशत्वाभावेनियमभंगइतिवाच्यं॥उक्तान्यतरत्वावच्छिन्नसाध्यक
द्रव्यत्वादिहेतौपृथ्वीत्वाभावसादायाव्याप्तिसत्वेनतदकथनेनन्यूनतापत्तेः॥एतेनयत्किंचित्साध्याधिकरणावृत्तिवृत्तित्वं
तदितिपरास्तमितिचेन्नैवं॥यतःव्यधिकरणद्वयवृत्तित्वंहेत्वधिकरणांतर्भावेणवैयधिकरण्यघटितंबोध्यं॥तच्चयत्किंचित्सा

ध्यानधिकरणहेत्वाधिकरणद्रव्यवृत्तित्वं हेत्वधिकरणांशे पर्यवसितं तथा चोक्तान्यतरत्वावच्छिन्नसाध्यकद्रव्यत्वादिहेतौ तत्साध्यद्र
२९ साध्यतावच्छेदकत्वाद् दुष्टव्यतास्ति धिरिति दिक् ॥ यावद्धर्मेष्वभिन्निति ॥ यावन्तः पातिनोऽनुगतसत्त्वादेः किं विद्व्यक्तिवृत्तित्वविशि
ष्टाभावमादाय नाव्याप्तिसम्भवः उक्तवैशिष्ट्यानवच्छिन्नप्रतियोगिताकत्वविशेषणेनैव वारणादिति भावः ॥ आदिनाश
ब्दवान् गगनत्वादित्यादेः परिग्रहः न क्षतिः ॥ निर्नियमभङ्गः ॥ एतद्वृक्षत्व[illegible]निति यद्यपि वृक्षत्वस्य साध्यत्वेऽपि व्यभिचारि
त्वमक्षतं ॥ तथापि पूर्वमेतद्वृक्षत्वस्य समवायेन हेतुतास्वीकारात् तदेव साध्यत्वेनानुसृतमित्थं वा तिशयेन व्यभिचारस्फू
र्त्तिरिति ध्येयं ॥ वृत्तित्वविशिष्टः सन्वर्तत इति ॥ प्रतियोग्यनधिकरणवृत्तित्ववैशिष्ट्यावच्छिन्नाधेयताशालीत्यर्थः ॥ तन्नि
ष्ठाधिकरणतानिरूपकतावच्छेदकस्यैव तन्निरूपिताधेयतावच्छेदकत्वमित्याशयः ॥ विशिष्टाधेयतायाश्च नतिरि
क्तत्वे तु यावन्निष्ठप्रतियोग्यनधिकरणवृत्तित्वविशिष्टाधिकरणताको भावो निवेश्यः ॥ प्रतियोग्यनधिकरणवृत्तित्वं
विशिष्टाधिकरणतानिवेशापेक्षया साध्याभावाधिकरणे स्वप्रतियोग्यधिकरणत्वनिवेशे लाघवमित्यालोच्य तथै

वाह॥प्रतियोग्यनधिकरणीभूतेति॥अयमात्मेति साध्यसाकल्यकत्वेन प्रलयाविषयकज्ञानत्वावच्छिन्नस्य साध्यत्वेत्याशयः॥
अत एव हेतुकोटौ महत्स्येदं दत्तं॥अन्यथा आत्मत्वसाध्यकात्मकालान्यतरस्य हेतुतायामपि महाप्रलयादेः कालिकसं
बंधेन प्रतियोग्यधिकरणतायाः सत्वेन प्रतियोग्यनधिकरणसाध्याभावाधिकरणं गगनमेवेत्यतिव्याप्तेः॥सत्त्वेन महत्पद
व्यर्थतापत्तेः॥लादृशजन्यज्ञानत्वावच्छिन्नस्य साध्यत्वे तु केनापि संबंधेन प्रतियोगिनः प्रलये सत्वेन प्रतियोग्यनधिकरणसा
ध्याभाववति प्रलये हेतोः सत्वादनाप्तेः॥व्याप्तिसंभवदिति महत्पदसार्थकता॥ननु धूमवान्वह्नेरित्यादौ यथातिव्याप्तिरस्त्ये
व॥अयोगोलकादौ कालिकादिसंबंधेन धूमस्य सत्वादिति लड्वपेक्षायां बीजाभावदिति वाच्यं॥जन्यमूर्तस्यैव दिग्गुणाधितया
दृश्यपरमाणुर्वह्निना संयुक्तो धूमेन चासंयुक्तस्तत्र केनापि संबंधेन धूमाधिकरणतायाः असत्वेन प्रतियोगि संबंधिसाध्याभावाधि
करणे तस्मिन् प्रतियोगिसंबंधिवृत्तित्वविशिष्टहेत्वभावसत्वेनातिव्याप्तेरनवकाशात्॥परे तु महत्पदं परममहत्त्वविशिष्टस्यैव कालत्वं
नत्वन्यस्य किंतु पार्थिवत्वमेवेति मतलाभाय॥एतावता धूमवान्वह्नेरित्यादिप्रसिद्धस्थलापेक्षाबीजं सूचितमित्याहुः॥एकज्ञान

विषयत्वादीनां संसर्गतास्वीकारे प्रतियोग्यनधिकरणत्वस्थाने प्रतियोग्यसंबंधित्वनिवेशे च आत्मावृत्तिधर्मवानात्मत्वादित्यादा
३० वपि तादृशहेत्वभावाप्रसिध्य इत्यसंभवः॥ अन्यथा त्वव्याप्तिरित्याशयेनाह असंभवो व्याप्तिर्वेति॥ प्रतियोगितावच्छेदकसंबंधे
न प्रतियोगिवैयधिकरण्यनिवेशापेक्षयैतत्कल्पे लाघवं दर्शयति इत्यन्ये वेति॥ साध्यतावच्छेदकेन च संबंधेन प्रतियोगिवैयधिक
रण्यनिवेशनेत्यर्थः॥ असंभवातिव्याप्तोरिति॥ साध्याभावप्रतियोगितायां संबंधविशेषावच्छिन्नत्वानिवेशे वह्निमान्धूमादित्या
दौ संबंधांतरावच्छिन्नसाध्याभावं प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणमादायासंभवः हेत्वभावप्रतियोगिता
यां संबंधविशेषावच्छिन्नत्वानिवेशे च धूमवान्वह्नेरित्यादौ समवायादिना वह्न्याद्यभावस्य सकलसाध्याभाववन्निष्ठत्वासं
भवेनातिव्याप्त्यसंभवेपि आत्मभिन्नं द्रव्यत्वादित्यादौ कालिकसंबंधेन द्रव्यत्वाभावस्य प्रतियोगितावच्छेदकसंबंधेन प्रति
योगिव्यधिकरणस्य सकलसाध्याभाववन्निष्ठत्वादतिव्याप्तिस्तयोरनवकाशादित्यर्थः॥ परामर्शासंभव इति॥ सर्वनाम्ना
मुत्सर्गतः प्रधानपरामर्शित्वादिति भावः॥ तस्यैवाभावेन्वय इति॥ अवच्छिन्नप्रतियोगिताकत्वस्याभावपदोपस्थाप्य ३०

एवोभावेन्वयस्वीकारात्‌विशिष्टसत्त्वात्वेननास्तीतिनप्रत्ययः इतिभावः प्रतियोगितायाः द्वैधाभानेगौरवादाह प्रतियोगीति ॥ इति
त्वविशिष्टनिरूपितेति ॥ इदंगौरवस्फोरणाय ॥ वस्तुतः सकलसाध्याभाववन्निष्ठाहेतुतावच्छेदकावच्छिन्नानधिकरणतातद्वृ
त्त्यभावप्रतियोगित्वमर्थः ॥ अतएवास्मदीयफलितार्थस्यागुरुत्वादित्तिवक्ष्यति ॥ अन्यथाताद्दशार्थस्यलघुत्वादितिवदेत्‌ ॥ नि
र्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादावव्याप्तिदानंयथाश्रुताभिप्रायेणेतिसमाधानमग्रिमफलितार्थेइवात्रापिसमानमिति
वह्न्यभाववद्ह्रदस्यवह्निस्वरूपत्वमतेव्याप्तिदानमित्यपिवदंति ॥ मूलानुरोधेनेति ॥ अतएवप्रतियोग्यनधिकरणसाध्याभावाधि
करणेत्यतः साध्यानधिकरणेत्यस्यलघुत्वेपिनक्षतिः ॥ साध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकविशिष्टानधिकरणसक
लनिष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नंयद्धेतुतावच्छेदकावच्छिन्नंप्रतियोगित्वंतद्वत्त्वमितिनिष्कर्षः ॥ अत्रेदम
वसेयंएतल्लक्षणस्यव्यतिरेकव्याप्तितयानुपसंहारित्वात्मकव्यभिचाराभावरूपत्वमिति ॥ अशेषमात्रपरत्वमितिअशेषत्व
मुद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्याप्तिकधर्मत्वंउद्देश्यतावच्छेदकव्यापकत्वंविधेयपर्यवसितंतत्त्वव्यापकत्वंलाघ

ग॰टि॰

वाङ्द्रवघटितं बोध्यं ॥ इत्थं च तद्वृक्षसत्त्वानुकपिसंयोगादित्यादावतिव्याप्तिवारणाय हेत्वभावप्रतियोगिवैयधिकरण्यविशेष
३१ णस्य सार्थकतेत्याशयः ॥ कृत्स्नत्वादिरिति ॥ कृत्स्नत्वमिह हेत्वितरावृत्तिः तेन न साध्ये सा कल्याप्रसिद्धिः आदिना स्वेतरादिपरिग्र
हः ॥ निर्धूमत्व व्याप्यत्वावच्छिन्नस्यापि स्वरूपसंबंधेनैव साध्यतान्यथा सद्धेतुत्वानुपपत्तिरित्यपि संबंधव्यभिचारिणि ॥ आ
त्मभिन्नं द्रव्यत्वादित्यादौ ॥ हेतुभेदमादायापीत्यपिना हेतुत्वस्यंताभावपरिग्रहः ॥ भेदहेतुकेति वह्निमान्धूमभेदादित्यादावित्य
र्थः ॥ स्मस्मिन्नेवेति ॥ गगनाभाव एव धूमभेदाद्यात्मकहेतुभेदत्वेन वृत्तित्वमित्यर्थः ॥ यदि हेतुभेदत्वेनापि गगनाभावस्य केवला
न्वयित्वं तदा हेतौ हेतुभेदात्मकगगनाभावसत्त्वेन धूमभेदो धूमभेदो नेति प्रयोगापत्तिरिति भावः ॥ एतादृशरीत्यात्राव्याप्यवृत्ति
रपि ॥ आदिपदग्राह्यस्थले व्याप्तिं वदतां मतमाह ॥ अत्र केचिदिति ॥ वन्ह्याभावांतर्भावेण व्यभिचारवारणाय हेतुकोटौ वन्ह्य
ाभाव्यत्वं विशेषणं ॥ वन्ह्यभावासंताभावस्य वन्ह्यभावान्यत्वविशिष्टवन्ह्यभावात्यंताभावस्य एवमग्रेपि सत्त्वादिति भावः ॥
पारिभाषिकमिति ॥ स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वरूपमित्यर्थः ॥ अत्र प्रतियोगिवैयधिकरण

३२

न्नारीरेप्रतियोगितावच्छेदकत्वमपिपारिभाषिकमेवबोध्यं॥अन्यथाहेतुतावच्छेदकसंबंधेनाभाववत्वावच्छिन्नानधिकरणाप्रतिसिध्या
पत्तेरितिभावः॥लक्षणसमन्वयसंभवादितिनचकालिकसंबंधावच्छिन्नप्रतियोगिताकविशिष्टवह्न्यभावाभावस्यतत्संबंधावच्छिन्न
केवलवह्न्याभावाभावसमनियततयातद्वैक्येनकेवलवह्न्यभावत्वस्यैवतत्प्रतियोगितावच्छेदकतयाप्रतियोगितायाः हेतुतावच्छेदका
नवच्छिन्नत्वेनाव्याप्तेर्वारणासंभवइतिवाच्यं॥तादृशविशिष्टवह्न्यभावाभावस्यवह्न्यभावोप्यवच्छेदकःकेवलवह्न्यभावाभावस्यतुवह्नि
मद्भेदएवावच्छेदकइत्यवच्छेदकभेदेनतयोरभावयोर्भेदात्॥अन्यथाकपिसंसंयोगाभावपिपीलिकासंयोगाभावयोरप्यभेदाप
त्तेरितिध्येयं॥हेतोर्विपक्षाघ्नतासंपत्तयेविशेषणताविशेषेति॥रूपस्येति॥तत्संबंधावच्छिन्नप्रतियोगिताकाभावाभावःतत्संबं
धस्वरूपइतिमतेनः॥हेतोःसाध्याभाववत्वेहेतुमाहतस्येति॥सामानाधिकरण्यसंबंधेनवह्न्यभावरूपहेतोरित्यर्थः॥दर्शितरी
त्येतिवह्निसामानाधिकरण्यरूपस्यसामानाधिकरण्येनवह्निरूपस्यवासकलसाध्याभावनिष्ठत्वासंभवेलक्षणसमन्वयो
नसंभवतीतिभावःसकलशब्दस्योद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्याप्तिकधर्मावच्छिन्नेशक्तत्वेनपर्यवसितार्थमाहव्या

पकत्वार्थैति ॥ लक्षणार्थंचकएवशेषइति ॥ नन्वेयमव्याप्तिमूलकतानोक्तेतिन्यूनताः केवलान्वयित्वस्य हेतुतावच्छेदकसंबंधा
नुयोगिनिष्ठभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकत्ववत्वरूपस्यसत्तादिसाधारण्येनतत्राव्याप्तिरुक्तत्वेनादोषादृविति ॥ ध्येयंन
३२ नुकेवलान्वयित्वस्यात्यंताभावप्रतियोगितानवच्छेदकानद्धर्मत्वयस्यभेदप्रतियोगितानवच्छेदकत्वस्यवाप्रसिद्धत्वेस्त्रनोकरिति
रत्प्रमितेत्यन्यप्रकारांतरामनुसरतिस्मास्त्वेवेति ॥ हेतुतावच्छेदकसंबंधेनहेतुमत्ताज्ञानंप्रतीति ॥ हेतुतावच्छेदकासंबंधाव
च्छिन्नहेतुप्रकारताशालिज्ञाननिरूपितप्रतिबंधकतावच्छेदककेहेत्वाभावानिष्ठाप्रकारतावच्छेदकसंबंधेनेत्यर्थः ॥ अत्राहेतुम
त्ताज्ञानप्रतिबंधकत्वंयदित्वेतुमत्ताज्ञाननिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकत्वंतदाअयमात्माकालिकसंबंधावच्छिन्न
प्रतियोगिताकाकाशाभावादित्यादोस्वरूपसंबंधेनव्यभिचारिणिहेतुमान्वगगनवांश्चेतिसमूहालंबनहेतुमत्ताज्ञानंप्रति
देशिकविशेषणतासंसर्गकस्यगनाभावात्मकेहेत्वभाववत्ताग्रहस्यप्रतिवंधकतयादेशिकविशेषतयोअपिताद्दत्वेन
संबंधेनहेत्वभाववत्तावच्छिन्ना‘नधिकरणत्वस्याप्रसिध्यागगनत्वाभाववत्त्वस्यैवस्वपदेनधर्तुशक्यत्वेनहेत्वभावस्याव्याप

कतापत्त्यातिव्याप्तिनवहेतुतावच्छेदकावच्छिन्नप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिवेशात्समूहालंबनमादायदोषइ
तिवाच्यं॥तथापितत्ध्वंसभिन्नप्रतियोगितासंबंधेनवह्नेरित्यादौहेत्वभावत्वावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकाभा
वज्ञानस्यापिसाध्यप्रकारकतयातत्प्रतिबंधकज्ञानविषयकालिकसंबंधमादायातिव्याप्तिः।तेनसंबंधेनस्वावच्छिन्नानधिकरणत
स्यव्यभिचारनिरूपकाधिकरणेतध्वंसेतदसमानकालिकपदार्थमादायैवोपपादनीयत्वात्॥अतःहेतुमत्ताज्ञानसामान्यप्रति
बंधकत्वंवक्तव्यंतत्त्वहेतुमत्ताज्ञानत्वव्यापकप्रतिबंध्यताकत्वपर्यवसितं॥तथाचसंबंधांतरेणहेतुमतामहसाधारणहेतुमता
महत्वव्यापिकानकापिप्रतिबध्यतेतिहेतुतावच्छेदकसंबंधेनेत्युक्तं॥हेतुमताज्ञानमित्यत्रज्ञानपदंप्रतिबंधकसमानधर्मितावच्
छेदकज्ञानपरमित्यादिकंसाध्यतावच्छेदकसंबंधेनसाध्यवत्ताज्ञानंप्रतीत्यादिफक्किकाव्याख्यानोक्तरीत्यावसेयं॥नचयत्किं
चित्संबंधेनहेतुमताज्ञानसामान्यंप्रतीत्यस्यापिनिर्वाहइतिवाच्यं॥स्पंदभिन्नंकालिकसंबंधावच्छिन्नप्रतियोगिताकद्रव्य
त्वाभावादित्यादौकालिकसंबंधेनव्यभिचारिण्यतिव्याप्तिः।कालिकसंबंधस्यस्वरूपसंबंधेनहेतुमत्ताग्रहविरोधित्वानियाम
कतयातेनसंबंधेनस्वावच्छिन्नानधिकरणात्वस्यस्पंदासमानकालीनपदार्थमादायैवोपपादनीयत्वादितिदिक्॥ध्येयमेवेति।

तथाच निरुक्तप्रतियोगिवैयधिकरण्यविशिष्टायद्धर्मावच्छिन्नाभावत्वं स्वावच्छिन्नानधिकरणसाध्याभावाधिकरणकं यत्तदन्य
नूनतद्धर्मवत्त्वमितिसमुदितार्थः॥ एतद्वृक्षत्ववान्कपिसंयोगादित्यादौकपिसंयोगानधिकरणवृत्तित्वविशिष्ट कपिसंयोगाभावत्वं एतादृ
३३ शस्वमितिनातिव्याप्तिरिति भावः॥ एतद्वृक्षत्ववान्कपिसंयोगाभावादित्यादौतुप्रतियोगिवैयधिकरण्यविशिष्टहेत्वभावस्याप्रसिद्धत्वा
न्नातिव्याप्तिरितिध्येयंलाघवादाह नदेयमेवेति॥ केचित्तुदेयमेवेति॥ तथाचप्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्वावच्छिन्नाधिकरण
भिन्नसाध्याभावाधिकरणकंयद्यत्तद्भिन्नत्वमर्थः॥ नन्वेवमेतद्वृक्षत्ववान्कपिसंयोगाभावादित्यादौकपिसंयोगात्मकाभावत्वं नस्व
कपिसंयोगाभावरूपप्रतियोग्यनधिकरणाप्रसिद्धेः किंतुअभावान्तरत्वंस्वमित्यपिव्याप्तिरतस्तत्रानिर्भरमाह नदेयमेवेतिव्याचक्षुः
तच्चिंत्यंहेत्वभावप्रतियोगिवैयधिकरण्यविशेषणंदेयमितित्यथस्वरसभंगापत्तेरितिदिक्॥ ननुतर्हि॥ एतद्वृक्षत्ववान्कपिसंयोगा
दित्यादौहेत्वभावत्वावच्छिन्नानधिकरणाप्रसिध्यापुनरतिव्याप्तिरतआह अधिकरणत्वाभावस्यैवेतिननुहेत्वभावाधिकरणत्वाभावस्य
हेतुरूपत्वेहेतुतावच्छेदकसंबंधेनस्वावच्छिन्नाधिकरणत्वाभाववत्वस्यविवक्षणीयतयासत्तावान्जातेरित्यादौसाध्याभाववृत्ति
सामान्यादौतेनसंबंधेनतद्वृत्त्वाप्रसिध्याव्याप्तिरतआह॥ अधिकरणत्वाभावादिश्चेति॥ साध्यतावच्छेदकताघटकसंबंधेनेत्या

३३

ति:॥तेनगुणवान्द्रव्यत्वादित्यादौविषयितयागुणत्वविशिष्टवद्भेदमादायनाव्याप्तिः॥प्रतियोगितावच्छेदकतायांसाध्यताघटकसंबंधा
वच्छिन्नत्वस्याप्येवमेवप्रयोजनमूह्यं॥असंप्रयोगादिति॥व्युत्पत्त्यनुरोधादित्यनेनान्वपि॥अनुरोधादित्यस्यचवारणेत्यनेनान्वयः॥नन्वनुयोगि
तावच्छेदकावच्छेदेनैवान्योन्याभावादिरन्यादिपदेनप्रत्याय्यतेइत्यनेनैवद्रव्यंनघटइत्यादेर्वारणसंभवः॥द्रव्यत्वावच्छेदेनघटभेदस्यबाधा
दित्यग्निमांस्तोनिरर्थकंचेदत्रसंप्रदायज्ञाः॥अनुयोगितावच्छेदकावच्छेदेत्यस्यानुयोगितावच्छेदकंधर्मीतावच्छेदक।इत्यर्थः॥तथा
च्चाग्निमांस्तांविनोक्तप्रयोगवारणासंभवइतितत्सार्थकमित्याहुः॥ननुनीलघटत्वस्यकथंप्रतियोग्यवृत्तित्वमितिचेन्नविशिष्टसत्तावान्
गुणान्यइतिप्रयोगस्यप्रामाण्यायविशिष्टसत्वस्ययादृशंप्रतियोग्यवृत्तित्वंतादृशमेवेतिगृहाणघटोन्यइत्येवपाठइतिवदन्तमाक्षिपंस
मस्तोभवतुव्यस्तोवाउभयथापिअन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकाभावबोधकत्वमस्त्येवापितुन्यएवविशेषइतिदर्शयति
घटादन्यइत्यादावपितुघटत्वावच्छिन्नत्वविशिष्टेति॥समानाधिकरण्यसंबंधेनतद्विशिष्टेत्यर्थः॥ननुआधेयतात्वेनसंसर्गत्वंनतुविशिष्टा
धेयतात्वेनेत्यतआह॥अथवेति॥एकत्रविशेषणतयान्वितस्यान्यत्रतस्यातंत्र्येणान्वयोनास्तीतिव्युत्पत्तिसंगमइतिएकविशेषण
ति॥पदार्थः॥पदार्थेनान्वेति॥ननुतद्देशकदेशेनेतिव्युत्पत्तिःससंबंधिकातिरिक्तस्थलेइत्यन्यपदार्थस्यसंबंधिकत्वान्नदोषइत्याह॥

अन्यपदार्थैकदेशइति॥ लक्षणिकत्वादिति॥ नामार्थयोरभेदसंसर्गेणेतिनियमानुरोधेनेतिभावः॥ घटादन्यः नपटादित्यादौपंचम्याः प्रतियोगित्वं
३४ चेद्‌[illegible]स्तथापटनिष्ठप्रतियोगितायाः निरूपकतासंबंधावच्छिन्नप्रतियोगिताकाभावबोधोवाच्यः॥ सच्चनसंभवति निरूपकतायावृत्त्यनि
यामकत्वात्तादृशाभावप्रसिद्धेरितिवदतांमतंदर्शयति॥ नवीनमतेत्वि ति॥ कथंचिदिति॥ अन्यपदार्थैकदेशेभेदभेदसंबंधेनसाध्यव
नुयोगिताकस्यभाने धर्मिपारतंत्र्येण साध्यवत्तोप्यनुयोगितासंबंधेन तत्रभानोपगमादनुमित्यौपयिकव्याप्ति[illegible]रूपिततालाभइतिके
चित्॥ परेतु लक्षणवाक्ये चरमपदं तादृशार्थेलाक्षणिकमन्यत्वात्पर्यग्राहकमिति॥ कथंचिदित्यस्यार्थइत्याकूतः॥ नीलोघटइति॥
कंबुग्रीवादिमन्निष्ठप्रतियोगिताकभेदभानोपगमेएतादृशवाक्यस्याप्रामाण्यंनसंभवतीतिभावः॥ ननुकंबुग्रीवादिमत्वाव
च्छिन्नत्वस्यापितच्छून्यप्रतियोगितायांभानमुपेयतेतथाचाप्रामाण्यमुपपद्यतइत्यतआहपटइति॥ तथासतितस्याप्यप्रामाण्यं
स्यादितिभावः॥ तदवच्छेदकत्वाभावकूटेति॥ तादृशावच्छेदकत्वसामान्याभावनिवेशेकंबुग्रीवादिमत्वविशिष्टसंबंधिनिष्ठाभा
वप्रतियोगितावच्छेदकतात्वापेक्षयाघटसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकतात्वस्यलघुतयातादृशसामान्याभावाप्रसि
धेरितिकूटनिवेशः॥ ननुघटोनप्रमेयगगन[illegible]मितिप्रतीतिव्यवहारयोरनुपपत्तिः॥ तथाहिगगनत्वापेक्षयाप्रमेयगगनत्वस्य

गुरुत्तया तदवच्छिन्नभेदाप्रसिध्या तद्धर्मरूपितं पारिभाषिकमेवावच्छिन्नत्वं प्रतियोगितायां भासइ इति वक्तव्यं तच्चेतद्विशिष्टसंबंधीत्या

दिरूपं तदाप्रमेयगगनत्वविशिष्टप्रतियोगिकसंयोगिनोप्रसिध्या तस्याप्रसिद्धिः॥ किंच वह्निर्न वह्निरिति प्रतीतिव्यवहारयोरयोराप

त्तिः तादृशेंधनत्वावच्छिन्नभेदसत्वात् तादृशधर्मावच्छिन्नभेदकूटभानोपगमेइंधनं न वह्निरिति प्रयोगानुपपत्तिरिति चेदत्र केचित् अन्वयि

तावच्छेदकव्यापकधर्मावच्छिन्नत्वे तात्पर्यं एतद्विष्टसंबंधीत्वस्य विशिष्टात्मकोयः संबंधीत्यर्थः॥ अभावपदं भेदार्थकमिति तल्लाभः॥

एवं च प्रमेयगगनत्वव्यापकगगनत्वावच्छिन्नत्वं प्रसिद्धमेवेति न दोषः॥ न च वह्निर्न वह्निरिति प्रयोगापत्तिस्तदवस्थैव इंधनत्वस्य व

ह्नित्वाव्यापकत्वेपि वह्निघटोभयत्वस्य व्यापकत्वात् तदवच्छिन्नभेदस्य चाबाधितत्वात् वह्निर्न घटपटोभयं एकोन द्वाविति प्रतीत्युप

पत्तये व्यापकताघटकभेदे प्रतियोगितावैयधिकरण्यस्य निवेशनीयत्वादिति वाच्यं॥ अन्वयितावच्छेदकावच्छिन्नानुयोगिताक

प्रतियोगितानवच्छेदकत्वरूपस्यान्वयितावच्छेदकधर्मव्यापकत्वस्य निवेशेनादोषात् वह्निर्न घटपटोभयमित्यादिप्रत्ययस्य प्रति

योगित्तावैयधिकरण्यमनिवेश्यापि निर्वाहसंभवात् एतेनान्वयितावच्छेदकधर्मसमनियतधर्मावच्छिन्नत्वमेव पारिभाषिकमव

छिन्नत्वमिति कस्यचित्प्रयासोनोपादेयः॥ वह्नित्वसमनियतत्तार्णातार्णदहनोभयत्वावच्छिन्नभेदमादायोक्तापत्तेर्दुर्वारत्वा

संबंधीत्यादिरर्थः॥अयंग्रंथस्तु अत्यंताभावान्योन्याभावप्रतियोगितासाधारणावच्छिन्नत्वप्रदर्शनपरः॥१॥

त्रेत्याहुः॥परेतु तद्विशिष्टसंबंधीत्यादेः तद्विशिष्टस्ययः तेथावत्तद्व्यापकधर्मावच्छिन्नत्वंपरित्यज्यतदवच्छिन्नव्यापकतावच्छेदकरूप
वच्छिन्नत्वानुधावनंसत्तात्वव्यापकविशिष्टसत्तात्वावच्छिन्नाभावमादायगुणः सत्ताभाववानितिप्रतीतेर्वारणाय॥पारिभाषिकमव
३५ छिन्नत्वंयत्संबंधावच्छिन्नप्रतियोगितायाभासतेतेनसंबंधेनतद्विशिष्टसंबंधित्वंव्यापकताघटकाभावप्रतियोगित्वंतास्ताद्धए
वचतदात्म्येनप्रमेयागगनत्वविशिष्टसंबंधिगगनंप्रसिद्धमेवेतिनकोपिदोषः॥नचव्यापकताघटकाभावप्रतियोगिवैयधिकर
ण्यंवक्तव्यमन्यथाघटस्यसंयोगेनकंबुग्रीवादिमद्व्यापकत्वानुपपत्तेः॥तथाचतेनसंबंधेनप्रतियोग्यसंधियत्तद्विशिष्टसंब
धि॥तन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावकूटवदवच्छिन्नत्वमितिनिष्कर्षः एवंचवह्निर्नवह्निरितिप्रयोगापत्तिर्दुर्वारा
वह्निघटोभयत्वस्यतादात्म्येनप्रतियोग्यसंबंधियद्वह्निसंबंधितन्निष्टभेदप्रतियोगितानवच्छेदकादितिवाच्यंयतः॥प्रति
योगिवैयधिकरण्यंननिवेश्यतेपितुतद्विशिष्टसंबंधिनिष्ठत्वंतद्विशिष्टावच्छिन्नानुयोगिताकत्वरूपमिवविवक्ष्यते वह्नि
घटोभयभेदानुयोगितायांसमवायेनवह्नित्वस्यैवतादात्म्येनवह्नेरप्यवच्छेदकत्वमानुभविकमतः वह्निव्यापकतावच्छेदकेनव
ह्निघटोभयत्वमितिनोक्तदोषः॥कंबुग्रीवादितत्संबंधिन्युत्पत्तिकालघटाभावसत्वेपितदनुयोगितानकंबुग्रीवादिमदव ३५

छिन्नाविभिन्नकालिकत्वादित्याहुः॥लक्षणवाक्यात्साध्यवत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावकूटवदव
च्छिन्नत्वसंबंधेनसाध्यवद्विशेषितायाःप्रतियोगितातत्तादृशप्रतियोगिताकभेदवदवृत्तित्वस्यलाभेपिन॥तादृशार्थोव्याप्तिःअपितु
साध्यवच्छिन्नप्रतियोगिताकभेदवदवृत्तित्वरूपातस्याएवानुमित्युपयोगित्वादित्याह॥अनुमितिप्रतीति॥तादृश्यैवसाध्याव
च्छिन्नैवेत्यर्थः॥एवंचलक्षणवाक्यस्यसाध्यावच्छिन्नप्रतियोगिताकभेदवदवृत्तित्वरूपार्थेतात्पर्यमितिभावः॥ननुसाध्यव
च्छिन्नप्रतियोगिताकभेदघटितस्यलक्षणत्वेपियत्रसाध्यमपिगुरुयथाकंबुग्रीवादिमत्वान्नित्यादौघटाद्यपेक्षयाकंबुग्रीवा
दिमत्वविशिष्टंतत्रसाध्यावच्छिन्नप्रतियोगिताप्यप्रसिद्धेत्यतआह॥कंबुग्रीवादिति॥विरुक्तेति॥साध्यविशिष्टसंबंधिनि
ष्ठाभावप्रतियोगितावच्छेदकत्वाभावकूटवदवच्छिन्नत्वरूपमित्यर्थः॥अनुमित्योपयिकेति॥सर्वत्रेत्यादिः॥मतांतरमाह
तादृशेति॥उभयसाधारणंकेवलान्वयित्वमत्यंताभावप्रतियोगितावच्छेदकसाध्यतावच्छेदकत्वं॥तथाचगुरुधर्मावच्छि
न्नसाध्यकाव्याप्तिरपिमूलकृदभिमतेतिभावः॥केवलान्वयिभिन्नेद्रव्यंपृथिवीत्वादित्यादौशुद्धद्रव्यत्वापेक्षयाद्रव्यत्व

त्वविशिष्टस्यगुरुत्वयातदवच्छिन्नभेदाप्रसिध्याव्याप्त्यरधिकेत्यस्वरसोत्रबोध्यः॥ननुपंचमलक्षणेपिसत्तावान्जातेरित्या
३६ दावव्याप्तिःसामान्यादिनिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नवृत्तेरप्रसिद्धेरतआहसमासइति॥अत्रकेचित्तुहेतुता
वच्छेदकसंबंधावच्छिन्नतदन्यसंबंधेनैववृत्तिमत्त्वंनिवेश्यतेएवंचवह्निमान्धूमादित्यादौनाव्याप्तिःकालिकादिसंबंधस्य
हेतुतावच्छेदकसंबंधत्वात्॥हेतुप्रतियोगिकत्वान्चलक्षणाघटकत्वात्तदन्यसंबंधावच्छिन्नवृत्तित्वाभावस्यसत्त्वा
वाच्चसत्तावान्जातेरित्यादौचहेतुतावच्छेदकातिरिक्तहेतुप्रतियोगिककालिकसंबंधाद्यतिरिक्तविशेषणताविशे
षेणवृत्तित्वस्याप्रसिध्यानाव्याप्तिःनचहेतुतावच्छेदकस्वरूपान्यतरसंबंधेनवृत्तित्वंनिवेश्यैवसत्तादिसाध्यकेप्रसिद्धिर्वा
रयितुंशक्यतइतिभ्रमितव्यंअन्यतरत्वेनसंसर्गत्वोपगमेपिआत्मभेदसाध्यघटकत्वाभावात्कालिकसंबंधेनहेतुता
यामव्याप्तिप्रसंगात्॥नन्वेवमपिसत्तावान्प्रमेयादित्यादौसमवायेनहेतावव्याप्तिःसमवायस्यैवतादृशसंबंधत्वात्॥
तदवच्छिन्नवृत्तेरप्रसिद्धेरितिवाच्यंयतःसमवायावच्छिन्नप्रमेयाभावाभावत्वंसत्तायामेवस्वीक्रियतेहेतुप्रतियोगि

त्वस्यानेहेत्वभावावप्रतियोगिकत्वं निवेश्यते इत्थं च विशेषणताविशेषादिलक्षणघटको भवतीति न दोष इत्यलमिति विस्त
३७ रेणेत्याहुः॥ अत्र वृत्तिमत्त्वं हेतुतावच्छेदकसंबंधेन विवक्ष्यते पि हेतुतावच्छेदकसंबंधावच्छिन्नाधेयतासंबंधेन साध्याभाववतो
योऽभावस्तद्वत्त्वमित्यर्थः॥ एवमग्रेपि तथा च समानासाध्यके व्यधिकरणतादृशासंबंधावच्छिन्नसाध्याभाववदभावस्याप्रसिद्ध
त्वाव्याप्तिः न चैवं विशेषरूपेण संसर्गत्वमिति भ्रमितव्यं॥ आधेयतासंबंधावच्छिन्नावच्छेदकत्वादीनां तत्र संसर्गत्वं वदतां किंचि
त्प्रतियोगिकत्वाद्यात्मकविशेषरूपेण संसर्गत्वमनंगीकुर्वतां भट्टाचार्याणामप्येतस्य समतत्वादिति तर्ककर्कशविचारचातु
रीधुरीणैरिदं विभावनीयं॥ अधिकमस्मत्कृताभिनवदीधितिव्याख्यायामनुसंधेयं॥ ॥ गदाधरीटिकायां मुक्तामाला
यामीश्वरार्पितायां पंचलक्षणी समाप्तिः॥ ॥ श्रीलक्ष्मीनृसिंहार्पणमस्तु॥ सांबसदाशिवप्रसन्न॥ ॥